केरलपाठावलिः

# संस्कृतम्

## अष्टमी कक्ष्या

संस्कृतविद्यालयानां कृते

KERALA READER

# SANSKRIT

STANDARD

## VIII

FOR SANSKRIT SCHOOLS ONLY

Government of Kerala
Department of General Education
2025

## राष्ट्रगीतम्

जन-गण-मन-अधिनायक जय हे
भारत-भाग्य-विधाता
पंजाब-सिंध-गुजरात-मराठा
द्राविड-उत्कल-बंगा
विंध्य-हिमाचल-यमुना-गंगा
उच्छल-जलधि-तरंगा
तव शुभ नामे जागे,
तव शुभ आशिष मागे,
गाहे तव जय-गाथा ।
जनगणमंगलदायक जय हे
भारत भाग्य विधाता ।
जय हे, जय हे, जय हे,
जय जय जय जय हे ।

## प्रतिज्ञा

भारतं मम राष्ट्रम् । सर्वे भारतीयाः मे भ्रातरः । अहं मम राष्ट्रे स्निह्यामि । तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि । तद्योग्यतां सम्पादयितुं सदा यतिष्ये च । अहं पितरौ गुरूंश्चादरिष्ये बहुमानयिष्ये च । विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च । मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम् । राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि ।


Prepared by
State Council of Educational Research and Training (SCERT)
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
First Edition: 2025
Printed at : KBPS, Kakkanad, Kochi-30
Department of General Education, Govt. of Kerala

प्रियच्छात्राः,

अष्टमकक्ष्यायाः पौरस्त्यभाषापठनार्थं सज्जीकृतमिदं संस्कृतपाठ्यपुस्तकं भवतां पुरतः प्रस्तूयते। गीतम्, कथा, काव्यम्, ईहामृगः, विवरणम्, सुभाषितम् इत्येतैः व्यवहाररूपैः सह वृत्तालङ्कारव्याकरणशास्त्राणां च पठनं विभाव्य आसूत्रितं भवतीदं पाठ्यपुस्तकम्। राष्ट्रिय-कौशल-योग्यता-प्रारूपम्, विज्ञानविनिमयोपाधयश्च पाठ्यपुस्तकेऽस्मिन् परिगणिताः सन्ति।

स्वतन्त्रवाचनाय, स्वतन्त्रचिन्तायै सर्गाविष्काराय च पुस्तकेऽस्मिन् अवसराः समाकलिताः। भाषायाः प्रयोगरीतीः अवगन्तुं तद्द्वारा रचनाप्रवर्तनेषु भागभाग्भवितुं च पठनानुभवा: कक्ष्याप्रकोष्ठात् अवाप्तव्याः।

पुस्तकस्यास्य अध्ययनेन संस्कृतस्य विशालं लोकं प्रवेष्टुं प्रेरणा नूनं भविष्यतीति आशासे।

भवदीयः

**डा. जयप्रकाश् आर् के**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

## TEXT BOOK DEVELOPMENT COMMITTEE

SANSKRIT STANDARD VIII ORIENTAL

### Advisor

V. Madhavan Pillai, Associate Professor (Rtd.), Govt. Women's College, Thiruvananthapuram

### Chairperson

Prof. Radhakrishna Banergi M, HoD Sanskrit-Vyakarana ( Rtd), Govt. Sanskrit College, Thiruvananthapuram

### Experts

Dr. K. Narayanan, Asso. Professor, Dept. of Sanskrit, Sanatana Dharma College, Alappuzha

Dr. Aryambika S. V, Asst. Professor, Dept. of Sanskrit, N.S.S. College Cherthala, Alappuzha

### Participants

Aaruni S, S N V G H S, Paravoor, Kollam

Dr. Ajitha V, G G H S S Cotton Hill, Vazhuthacaud, Thiruvananthapuram

Dr. Asha A S, R R V G H S S, Kilimanoor, Thiruvananthapuram

Preethi K K, V P Oriental High School, Chokkly, Kannur

Dr. Shylaja K, New H S S, Nellimoodu, Thiruvananthapuram

Dr. Sreeja S, M V H S S, Arumanur, Thiruvananthapuram

### Artist

Santhosh K, Drawing Teacher, G H S, Neduva, Malappuram

### Layout

Manoj P G, S G U P S, Venmony, Idukki

### Academic Coordinator

Sujitha V

Research Officer, SCERT, Kerala.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING, KERALA

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| १ | क्षेत्रीयम् | १. लवनगीतम् | गीतम् | 7 - 16 |
| | | २. श्रद्धया जीवनं याप्यम् | कथा | 17 - 29 |
| २ | साहितीयम् | ३. काव्यमञ्जरी | काव्यम् | 30 - 45 |
| | | ४. जन्मदिनोपहारः | ईहामृगः | 46 - 56 |
| ३ | मानवीयम् | ५. दयालुः कुञ्ञन्पिल्ल | विवरणम् | 57 - 67 |
| | | ६. सतां पन्थाः | सुभाषितम् | 68 - 77 |

# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

**ഭാരതത്തിലെ ജനങ്ങളായ നാം** ഭാരതത്തെ ഒരു [1]**[പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി]** സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ **നീതിയും;**

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള **സ്വാതന്ത്ര്യവും;**

പദവിയിലും അവസരത്തിലും **സമത്വവും;** സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് **സാഹോദര്യം** പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

**നമ്മുടെ ഭരണഘടനാ നിർമ്മാണസഭയിൽ** ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം **ഇതിനാൽ ഈ ഭരണഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കുതന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.**

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക്" എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം" എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

# एककम् १

# क्षेत्रीयम्

## आमुखम्

पुरा मनुष्याणां जीविका मुख्यतया कृषिः आसीत्। तया सम्बद्धैः विविधैः उत्सवैः आघोषैः च सम्पन्नो भवति केरलदेशः। कृषिसम्बद्धानि बहूनि गीतानि इदानीमपि प्रचारे सन्ति। तेषु च लवनगीतानि नितरामाकर्षकाणि भवन्ति। अस्मिन्नेकके ' लवनगीतम् ' इति गीतं प्रथमः पाठः। केदाराः नद्यः कुल्याश्च कार्षिकवृत्त्यनुरूपाः प्रदेशाः। तेषां संरक्षणमस्माकम् उत्तरदायित्वं भवति। प्रकृतेः संरक्षणमधिकृत्य 'श्रद्धया जीवनं याप्यम्' इति एका कथा भवति द्वितीयः पाठः।

# प्रथमः पाठः
# लवनगीतम्

**पाठप्रवेशः**

चित्रे किं किं दृश्यते ?

तत्रस्थान् वचांशान् तालेन आलपन्तु।

गायन्तु रे गायन्तु
कर्षकगीतं गायन्तु



**आमुखम्**

कृषिक्षेत्रेषु कृषकाः प्रयत्नस्य काठिन्यं लघूकर्तुं बहूनि गीतानि आलपन्ति स्म। तेषु लवनगीतान्यपि **आसन्। 'वाय्त्तारि'** तालमनुसृत्य गेयानि इमानि अद्यापि प्रसिद्धानि भवन्ति। तादृशानि गीतानि भवन्तः श्रुतवन्तो वा ?

* 'वाय्त्तारि' इति कैरलीपदम्

# आयान्तु रे...

आयान्तु रे आयान्तु
केदारं जवमायान्तु ।
सर्वे लवित्रम् गृह्णन्तु
सर्वे मिलित्वा गायन्तु ॥

आयान्तु रे आयान्तु
केदारं  जवमायान्तु ।

सुवर्णशालीन् पश्यन्तु
सुनम्रमौल्यस्तिष्ठन्तु ।
सत्वरमेवं चिन्वन्तु
संग्रहगानं गायन्तु ॥

आयान्तु रे आयान्तु
केदारं जवमायान्तु ।

माता भूमिः सर्वेषां
जातानामिति जानन्तु ।
अन्नं तस्याः स्तन्यं रे
स्विन्नाः सन्तु तदर्थन्तु ॥

आयान्तु रे आयान्तु
केदारं जवमायान्तु ।

कर्षणमेवं वपनं वा
हर्षदसेचनकार्यं वा ।
पोषणमेवं लवनं च
उत्सवा एव भविष्यन्ति ॥

आयान्तु रे आयान्तु
केदारं जवमायान्तु ।

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| जवमायान्तु | - | जवम् | + | आयान्तु |
| सुनम्रमौल्यस्तिष्ठन्तु | - | सुनम्रमौल्यः | + | तिष्ठन्तु |
| सत्वरमेवम् | - | सत्वरम् | + | एवम् |
| जातानामिति | - | जातानाम् | + | इति |
| तदर्थन्तु | - | तदर्थम् | + | तु |
| कर्षणमेवम् | - | कर्षणम् | + | एवम् |

**विग्रहः**

सुवर्णशालीन् - सुवर्णस्य वर्णः इव वर्णः यस्य सः सुवर्णः। सुवर्णः शालिः सुवर्णशालिः, तान् सुवर्णशालीन्।

**क्रियापदपरिचयः**

| | | |
|---|---|---|
| आयान्तु | - | आङ्पूर्वक'या' (प्रापणे) धातोः (**परस्मैपदी** ) लोट् प्र. पु, ब.व। |
| गायन्तु | - | गै धातोः (**परस्मैपदी** )लोट् प्र.पु.ब.व। |
| पश्यन्तु | - | दृश् धातोः (**परस्मैपदी**) लोट् प्र.पु.ब.व। |
| तिष्ठन्तु | - | स्था धातोः (**परस्मैपदी**) लोट् प्र.पु.ब.व। |
| चिन्वन्तु | - | चिञ् धातोः (**परस्मैपदी**) लोट् प्र.पु. ब.व। |

## व्याकरणकार्यम्

**माहेश्वरसूत्राणि ( चतुर्दशसूत्राणि )**

| **सूत्रम्** | | **अन्तर्भूताः वर्णाः** |
|---|---|---|
| अइउण् | : | अ इ उ |
| ऋलृक् | : | ऋ लृ |
| एओङ् | : | ए ओ |
| ऐऔच् | : | ऐ औ |
| हयवरट् | : | ह य व र |

| | | |
|---|---|---|
| लण् | : | ल |
| ञमङणनम् | : | ञ म ङ ण न |
| झभञ् | : | झ भ |
| घढधष् | : | घ ढ ध |
| जबगडदश् | : | ज ब ग ड द |
| खफछठथचटतव् | : | ख फ छ ठ थ च ट त |
| कपय् | : | क प |
| शषसर् | : | श ष स |
| हल् | : | ह |

## पठनप्रवर्तनानि

**तालानुसारं लवनगीतम् आलपतु। ध्वनिमुद्रणं कृत्वा पुनः शृणोतु।**

**श्रद्धेयाः अंशाः -**

आलापनाभ्यासः।

तालानुसारमालापनम्।

पुनःश्रवणम्।

**उदाहरणानुसारं लोट् क्रियारूपाणि पाठभागात् चित्वा पट्टिकां पूरयतु।**

| उदा - आयान्तु |
|---|
| |
| |
| |
| |

**श्रद्धेयाः अंशाः -**

पाठभागस्य क्रियापदानाञ्च वाचनम्।

उचितपदानां चयनम्।

पट्टिकापूरणम्।

**अनुबन्धं २ पठित्वा कैरलीलवनगीतं  कक्ष्यायां सतालमालपतु ।**

**श्रद्धेयाः अंशाः -**

संघशः चर्चा ।

आलापनाभ्यासः ।

कक्ष्यायामवतारणम् ।

**संघशः लवनगीतस्य नृत्ताविष्कारं कुर्वन्तु ।**

**श्रद्धेयाः अंशाः -**

संघशः चर्चा ।

अभ्यासः ।

कक्ष्यायामवतारणम् ।

**माहेश्वरसूत्राणि विलिख्य तत्रान्तर्भूतान् वर्णान् पट्टिकारूपेण लिखत ।**

| **सूत्रम्** | **अन्तर्भूताः वर्णाः** |
|---|---|
| ऋऌक् | ऋ ऌ |
| हयवरट् | -------- |
| घढधष् | -------- |

**श्रद्धेयाः अंशाः  -**

व्याकरणांशपठनम् ।

पट्टिकापूरणम् ।

स्पष्टवाचनम् ।

**संघद्वये प्रथमसंघेन निर्दिष्टे सूत्रे अन्तर्भूतान् वर्णान् द्वितीयसंघः वदतु लिखतु च । एवं विपर्ययेणापि  ।**

**श्रद्धेयाः अंशाः -**

स्पर्धायाः आसूत्रणम्  ।

प्रश्नोत्तरचालनम्  ।

टिप्पणिलेखनम् ।

**लवनगीतमधिकृत्य टिप्पणिलेखनम् ।**

**श्रद्धेयाः अंशाः -**

संघचर्चा ।

आशयावगमनम् ।

टिप्पणीलेखनम् ।

**गृहेषु वा विद्यालयेषु वा लघुकृषिक्षेत्रं सज्जीकृत्य कार्षिकवृत्तिं करोतु । एतस्य प्रवर्तनस्य वीडियो मुद्रणं कृत्वा विद्यालयसभायाम् अवतारयतु ।**

**श्रद्धेयाः अंशाः -**

संघशः चर्चा ।

कृषिकार्याणां विभजनम् ।

निर्णीतं कृषिकार्यं कृत्वा वीडियो मुद्रणम् ।

विद्यालयसभायाम् अवतारणम् ।

## अमरकोशः

**अन्नम् -** भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः ।
(भिस्सा, भक्तम्, अन्धः, अन्नम्, ओदनः, दीदिविः)

**केदारः -** पुन्नपुंसकयोर्वप्रः केदारः क्षेत्रमस्य तु ।
कैदारकं स्यात्कैदार्यं क्षेत्रं कैदारिकं गणे ।
(वप्रम्, केदारः, क्षेत्रम्, कैदारकम्, कैदार्यम्, कैदारिकम्)

## धातुरूपाणि

**स्था धातोः (परस्मैपदी ) लोट् रूपाणि ।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तिष्ठतु / तिष्ठतात् | तिष्ठताम् | तिष्ठन्तु |
| **मध्यमपुरुषः** | तिष्ठ / तिष्ठतात् | तिष्ठतम् | तिष्ठत |
| **उत्तमपुरुषः** | तिष्ठानि | तिष्ठाव | तिष्ठाम । |

**दृश् धातोः (परस्मैपदी) लोट् रूपाणि ।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | पश्यतु / पश्यतात् | पश्यताम् | पश्यन्तु |
| **मध्यमपुरुषः** | पश्य / पश्यतात् | पश्यतम् | पश्यत |
| **उत्तमपुरुषः** | पश्यानि | पश्याव | पश्याम । |

**आङ्पूर्वक या धातोः (परस्मैपदी )लोट् रूपाणि ।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | आयातु / आयातात् | आयाताम् | आयान्तु |
| **मध्यमपुरुषः** | आयाहि / आयातात् | आयातम् | आयात |
| **उत्तमपुरुषः** | आयानि | आयाव | आयाम । |

## शब्दकोशः

| **संस्कृतम्** | **संस्कृतार्थः** | **कैरली** | **आङ्गलम्** |
|---|---|---|---|
| अन्नम् | भक्षणम् | ആഹാരം | Food |
| केदारः | क्षेत्रम् | കൃഷിസ്ഥലം | Field |
| जवः | वेगः | വേഗം | Speed |
| लवनम् | छेदनम् | കൊയ്ത്ത് | Reaping |
| लवित्रम् | दात्रम् | അരിവാൾ | Sickle |
| वपनम् | बीजाधानम् | വിതയ്ക്കൽ | Sowing |
| शालिः | व्रीहिः | നെല്ല് | Paddy |
| स्विन्नाः | स्वेदयुक्ताः | വിയർപ്പോടുകൂടിയവർ | Sweaty |

## अनुबन्धः

**१. स्वराक्षराणि - अचः स्वराः ।**

अ इ उ ऋ ऌ ए ओ ऐ औ।

**व्यञ्जनाक्षराणि - हलः व्यञ्जनानि ।**

| | | | |
|---|---|---|---|
| क ख ग घ ङ | - | कवर्गः | स्पर्शाः |
| च छ ज झ ञ | - | चवर्गः | |
| ट ठ ड ढ ण | - | टवर्गः | |
| त थ द ध न | - | तवर्गः | |
| प फ ब भ म | - | पवर्गः | |
| य र ल व | | - | अन्तःस्थाः |
| श ष स ह | | - | ऊष्माणः |

**२. कैरलीलवनगीतपरिचयः**

തിത്തെയ് തെയ് തെയ്യ്തെയ് താരോ
തകതെയ് തെയ് തെയ് തെയ് താരോ
നേരം വെളുത്തില്ല പെണ്ണേ.....
നേരോടടുത്തില്ല പെണ്ണേ.......
ഒരു നൂലു തുണ്ടം കോരി വച്ചില്ല പെണ്ണേ..... തെയ് തെയ്
തിത്തെയ് തെയ് തെയ്യ്തെയ് താരോ
തകതെയ് തെയ് തെയ് തെയ് താരോ
കാണ്ടിചിലമ്പി കാണാൻ
നോക്കല്ലേ പെണ്ണേ തെയ് തെയ്
മഴവന്നു വിളിച്ചീടുന്നു
ഇടപാതിയെ കേട്ടനേരം
തിത്തെയ് തെയ് തെയ്യ്തെയ് താരോ
തകതെയ് തെയ് തെയ് തെയ് താരോ
തെക്കുന്നാട് വടക്കോട്ടൊക്കെ
ചുടുചോര കണ്ടു പൊയ്ക്ക
പടിഞ്ഞാറെ തറമുററത്ത്
കുലദേവിയെ കണ്ടനേരം
തിത്തെയ് തെയ് തെയ്യ്തെയ് താരോ
തകതെയ് തെയ് തെയ് തെയ് താരോ......

(പരമ്പരാഗതഗാനം)

## किमधिगतम्

| पठनप्रवर्तनानि | स्वीकृतम् | भागिकतया स्वीकृतम् | प्रगत्यर्थं यत्नः करणीयः |
|---|---|---|---|
| लवनगीतस्य सतालमालापनम् । | | | |
| लोट् क्रियापदानां पट्टिकाकरणम् । | | | |
| कैरलीलवनगीतस्य आलापनम् । | | | |
| लवनगीतस्य नृत्ताविष्कारः । | | | |
| वर्णानां पट्टिकारूपेण लेखनम् । | | | |
| संघशः स्पर्धा । | | | |
| लवनगीतमधिकृत्य टिप्पणीलेखनम् । | | | |
| विद्यालयसभायामवतारणम् । | | | |

**अद्यतनपारिस्थितिकप्रश्नेषु जाग्रता पालनीया - चर्चां कुर्वन्तु ।**

# द्वितीयः पाठः

# श्रद्धया जीवनं याप्यम् ।



**पाठप्रवेशः**

**कक्ष्यायाः बहिरागतौ बालकौ दृष्ट्वा अध्यापिका अपृच्छत् ।**

अध्यापिका : कुत्र गच्छथः ?

बालकौ : अवकरान् निक्षेप्तुं गच्छावः ।

अध्यापिका : कुत्र निक्षिपसि ?

बालकौ : अवकरान् निक्षेप्तुं स्थापिते पेटके ।

अध्यापिका : ते विविच्य निक्षेपणीयाः ।

बालकौ : आम् । एतान् जैवाः अजैवाश्चेति विविच्य निक्षिपावः ।

अध्यापिका : एवमेव युवाभ्यां करणीयम् । नो चेत् ते प्रकृतिं नाशयिष्यन्ति ।

**आमुखम्**

कूप - तडाक - कुल्या - वापी - नद्यादीनि प्राणिनां जीवनोपाधयः भवन्ति । एतेषां संरक्षणमस्माकं कर्तव्यमस्ति । तथापि विवेकहीनाः मानवाःएतानि दूषयन्ति । अनेन दोषेण सर्वे प्राणिनः क्लेशान् अनुभवन्ति । विषयमिममधिकृत्य काञ्चन लघुकथां पठेम ।

कस्यचित् सरसः तीरे काचिद् बकी शाबकैस्सह अवसत्। सा प्रतिदिनं यत्र कुत्रापि अटित्वा आहारं सम्पाद्य प्रत्यागच्छति स्म। एवं सम्पादितं भोजनं शाबकानां चञ्चुकेषु विन्यस्य तेषां सन्तोषं निरीक्ष्य च सा मोदेन कालमयापयत् ।





दिनेषु गच्छत्सु कदाचित् सा केदारमेकं गत्वा तत्र दृष्टान् अवकरनिकरान् चञ्च्वा पादाभ्यां च विकिरति स्म।

क्षणादेव तस्याः पादद्वयमपि अवकरमध्यगतेन जालखण्डेन बद्धप्रायमभवत्। तस्मात् मोक्तुं सा यद्यपि बहुवारं यत्नमकरोत् तथापि सर्वे विफलाः अभवन्। सा अनेन प्रयासेन परिक्लान्तशरीरा चासीत्।





बक्या: पक्षताडनशब्दम् आक्रन्दनं च आकर्ण्य केदारसमीपे क्रीडन्तः केचिद् बालकास्तत्र आगच्छन्। तेष्वेकः धैर्येण तां गृहीत्वा तस्याः पादाभ्यां जालम् अपाकर्तुमारभत। अन्यः तस्य जालस्य छेदनं च अकरोत्।

जालात् मुक्तां तां बकीं ते तत्र मुमुचुः। बकी तु ससन्तोषं कांश्चन रवान् कृत्वा शाबकानां कृते आहारमन्विष्य अन्यत्र अगच्छत्।





तस्याः सन्तोषेण आकृष्टास्ते बालकाः मिलित्वा तत्रत्यानि पलास्तिकप्रभृतीनि वस्तूनि समस्तानि निवारयितुमारभन्त।




तदनु तत्र एकस्मिन् फलके एवं विलिख्य स्थापितवन्तश्च -

पलास्तिकादिकं सर्वं
प्रकृतिं नाशयेदहो।
श्रद्धया जीवनं याप्यम्
अतः सर्वैरनारतम्॥

**पदच्छेदः**

| | | |
|---|---|---|
| आक्रन्दनञ्च | - | आक्रन्दनम् + च |
| शाबकैस्सह | - | शाबकैः + सह |
| प्रत्यागच्छति | - | प्रति + आगच्छति |
| चासीत् | - | च + आसीत् |
| तत्रागताः | - | तत्र + आगताः |
| काचिद्बकी | - | काचित् + बकी |
| क्षणादेव | - | क्षणात् + एव |
| केचिद्बालकाः | - | केचित् + बालकाः |
| तेष्वेकः | - | तेषु + एकः |
| सन्तोषेणैव | - | सन्तोषेण + एव |
| स्थापितवन्तश्च | - | स्थापितवन्तः + च |
| तस्माद्देशात् | - | तस्मात् + देशात् |
| सर्वैरनारतम् | - | सर्वैः + अनारतम् |

**विग्रहः**

| | | |
|---|---|---|
| प्रतिदिनम् | - | दिने दिने। |
| अवकरनिकरान् | - | अवकराणां निकराः अवकरनिकराः, तान्। |
| अवकरमध्यगतेन | - | अवकराणां मध्यम् अवकरमध्यम्। तत्र गच्छतीति अवकरमध्यगतः, तेन। |
| जालखण्डः | - | जालस्य खण्डः। |
| बद्धप्रायम् | - | ईषत् बद्धम्। |
| परिक्लान्तशरीरा | - | परिक्लान्तं शरीरं यस्याः सा। |
| पक्षताडनशब्दः | - | पक्षयोःताडनं पक्षताडनम् , पक्षताडनस्य शब्दः। |
| केदारसमीपे | - | केदारस्य समीपे। |
| पलास्तिकादिकम् | - | पलास्तिकम् आदि यस्य तत् पलास्तिकादिकम्। |

**क्रियापदपरिचयः**

| | | |
|---|---|---|
| अभवन् | - | भूधातोः (परस्मैपदी )लङ् प्र.पु.ब.व.। |
| आसीत् | - | अस् धातोः (परस्मैपदी) लङ् प्र.पु.ए.व.। |
| अवसत् | - | वस् धातोः (परस्मैपदी) लङ् प्र.पु.ए.व.। |
| आरभत | - | आङ् पूर्वक रभ् धातोः (आत्मनेपदी) लङ् प्र.पु.ए.व.। |
| अकरोत् | - | डुकृञ् धातोः (परस्मैपदी) लङ् प्र.पु.ए.व.। |

## व्याकरणकार्यम्

**सुप्तिङन्तं पदम् १| ४ |२४ |**

सुबन्तं तिङन्तं च पदसंज्ञं स्यात्।

अत्र सुप्प्रत्ययाः विभक्तिप्रत्ययाः इति एवं तिङ्प्रत्ययाः क्रियापदप्रत्ययाः इति च अवगच्छेयुः।

यथा - राम+ सु - रामः। राम + औ- रामौ। राम + जस् - रामाः।

भू+ तिप् - भवति। भू + तस् - भवतः। भू + झि - भवन्ति।

**उपदेशेऽजनुनासिकः इत् १ | ३ | २२ |**

उपदेशे अनुनासिकः अच् इत्संज्ञः स्यात्।

**भूवादयो धातवः |२ | ३ | २१ |**

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।
अत्र भू इत्यादयः धातवः इति ज्ञायन्ते ।
यथा - भवति ।

**लट् स्मे । ३ | २ | २२८ |**

स्मशब्दयोगे भूतकालार्थः ।
वर्तमानकालिकक्रियापदेन सह स्म इत्यस्य प्रयोगे भूतकालार्थः सिद्ध्यति ।
यथा - प्रत्यागच्छति स्म - प्रत्यागच्छत् ।
विकिरति स्म - व्यकिरत् ।

**वृत्तविशेषः**

आदिमध्यावसानेषु
यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति
मनौ तु गुरुलाघवम् ॥

(लघुः 'U' चिह्नेन गुरुः '–' चिह्नेन च दत्तं भवति ।)

| | | | | |
|---|---|---|---|---|
| यगणः | U | – | – | आदिलघुः |
| रगणः | – | U | – | मध्यलघुः |
| तगणः | – | – | U | अन्त्यलघुः |
| भगणः | – | U | U | आदिगुरुः |
| जगणः | U | – | U | मध्यगुरुः |
| सगणः | U | U | – | अन्त्यगुरुः |
| मगणः | – | – | – | सर्वगुरुः |
| नगणः | U | U | U | सर्वलघुः |

**वृत्तपरिचयः**

**अनुष्टुप्**

श्लोके षष्ठं गुरु ज्ञेयम्
सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वम्
सप्तमं दीर्घमन्ययोः ॥

उदा :-

∪ - -
पलास्तिकादिकं सर्वं
∪-∪
प्रकृतिं नाशयेदहो ।
∪- -
श्रद्धया जीवनं याप्यम्
∪-∪
अतः सर्वैरनारतम् ॥

अत्र पद्ये चतुर्ष्वपि पादेषु पञ्चमो वर्णः लघुः षष्ठो वर्णः गुरुः च । द्विचतुष्पादयोः सप्तमवर्णः ह्रस्वः (लघुः) प्रथमतृतीयपादयोः तु सप्तमो वर्णः दीर्घः (गुरुः) । अतः पद्येऽस्मिन् "श्लोके ..... मन्ययोः" इति लक्षणमनुसृत्य श्लोको नाम वृत्तम् । श्लोक इतीदं वृत्तम् 'अनुष्टुप्' इति च उच्यते ।

## पठनप्रवर्तनानि



**पाठभागं कक्ष्यायाम् उच्चैः वाचयतु ।**

**श्रद्धेयौ अंशौ -**

उच्चारणशुद्धिः ।
आशयव्यक्तता ।

## कथां पठित्वा प्रश्नोत्तरक्रीडां चालयतु।

**श्रद्धेयाः अंशाः -**

संघचर्चा।
उचितप्रश्नावलीनिर्माणम्।
प्रश्नोत्तरक्रीडायाः चालनम्।
टिप्पणीपुस्तके लेखनम्।

## अमरकोशं पठित्वा समानपदानि चित्वा पट्टिकां पूरयतु।

| पदानि | समानपदानि |
|---|---|
| तीरम् | तटः |
| बकः | - - - |
| शावकः | - - - |
| सरः | - - - |
| रवः | - - - |
| केदारः | - - - |

**श्रद्धेयाः अंशाः -**

अमरकोशनिरीक्षणम्।
उचितशब्दानां चयनम्।
पट्टिकापूरणम् ।

## कथानुसारं कथास्तम्भान् क्रमीकरोतु।

१ ) बालकाः एकस्मिन् फलके किमपि विलिख्य स्थापितवन्तः।
२) शावकानां चञ्चुकेषु भक्षणं निक्षिपति।
३ ) जालात् मोक्तुं बहु प्रायतत।
४ ) सरितः तीरे सशावका बकी वसति स्म।
५ ) जालात् बकी मोचिता।
६ ) नीडे बक्याः शावकाः भक्षणं प्रतीक्षमाणाः अवर्तन्त।

**श्रद्धेयाः अंशाः -**

पाठभागस्य सम्यग् वाचनम्।
आशयग्रहणम्।
कथानुसारं क्रमीकरणम्।

**अधोदत्तखण्डिकायाः क्त्वान्त-ल्यबन्त-तुमुन्नन्त-अव्ययानि चित्वा लिखतु।**

अद्य मम मित्रस्य जन्मदिनम्। तस्य गृहं गत्वा तस्मै उपहारः देयः। एवं विचिन्त्य एकां लेखनीं क्रेतुम् आपणमगच्छम्। उपहारं गृहीत्वा मित्रस्य गृहं प्रविश्य तद्दातुम् ऐच्छं च।

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| | | |

**श्रद्धेयाः अंशाः -**

खण्डिकायाः वाचनम्।
उचितपदचयनम्।
पट्टिकायां निवेशनम्।

**पाठभागं भावानुसारं कक्ष्यायामवतार्य वीडियो निर्माय प्रदर्शयतु।**

**श्रद्धेयाः अंशाः -**

संघशः चर्चा।
कथाकथने परिशीलनम्।
कथाकथनम्।
वीडियो निर्माय प्रदर्शनम्।

**जीविते विविधसन्दर्भेषु अनुभूयमानान् कांश्चन क्लेशान् सामान्यबुध्या परिहर्तुं शक्नुमः । किन्तु क्लिष्टाः समस्याः अतिजीवितुं अपाकर्तुं च कृतहस्तानां साहाय्यम् अवश्यम् अपेक्ष्यते । तादृशाः प्रवृत्तिमेखलाः वृत्तीः च अधिकृत्य कक्ष्यायां चर्चित्वा लिखतु ।**

**श्रद्धेयौ अंशौ -**

संघचर्चा ।
प्रवृत्तिमेखलाः वृत्तीः च विविच्य लेखनम् ।

**पाठभागस्य प्रथमखण्डिकां पठित्वा नामपदानि क्रियापदानि च चित्वा पट्टिकायां निवेशयतु ।**

| नामपदानि | क्रियापदानि |
|---|---|
| सरः | अवसत् |
| | |
| | |
| | |
| | |
| | |

**श्रद्धेयाः अंशाः -**

निर्दिष्टांशस्य वाचनम् ।
नामपदानां क्रियापदानां च चयनम् ।
पट्टिकायां निवेशनम् ।

**निर्दिष्टश्लोकयोः अनुष्टुप् श्लोकः कतरः ?**

वागर्थाविव सम्पृक्तौ
वागर्थप्रतिपत्तये ।
जगतःपितरौ वन्दे
पार्वतीपरमेश्वरौ ॥

करारविन्देन पदारविन्दम्
मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानम्
बालं मुकुन्दं मनसा स्मरामि ॥

**जैवावकरम् अजैवावकरं च विविच्य पट्टिकां निर्मातु ।**

[अन्नावशिष्टानि, स्फटिकखण्डानि, शाकावशिष्टानि, शुष्कपत्राणि, निष्प्रयोजनानि वैद्युतोपकरणानि, निरुपयोगानि पलास्तिकवस्तूनि, उपयोगरहितानि कागदादीनि ]

| जैवावकरम् | अजैवावकरम् |
|---|---|
| | |
| | |
| | |
| | |

**श्रद्धेयौ अंशौ -**

निर्दिष्टांशानां विवेचनम् ।

उचितस्थाने लेखनम् ।

**व्याकरणकार्यं पठित्वा अधोनिर्दिष्टानां व्याकरणविशेषं विशदयतु ।**

- राम + सु - रामः
- राम + औ - रामौ
- राम + जस् - रामाः
- भवति इत्यत्र धातुः कः ?
- व्यकिरत् - विकिरति स्म ।

## अमरकोशः

शाबकः - पोतः पाकोऽर्भको डिम्भः पृथुकः शाबकः शिशुः ।
(पोतः, पाकः, अर्भकः, डिम्भः, पृथुकः, शाबकः, शिशुः)

सरः - पद्माकरस्तटाकोऽस्त्री कासारः सरसी सरः ।
(पद्माकरः, तटाकः, कासारः, सरसी, सरः)

जालम् - आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकम् ।
मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनम् ।
(आनायः, जालम्, शणसूत्रम्, पवित्रकम्, मत्स्याधानी, कुवेणी, बडिशम्, मत्स्यवेधनम्)

रवः - शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ।
(शब्दः, निनादः, निनदः, ध्वनिः, ध्वानः, रवः, स्वनः)

बकः - कह्वः पुष्कराह्वस्तु सारसः ।
(कह्वः, सारसः)

केदारः - पुन्नपुंसकयोर्वप्रः केदारः क्षेत्रमस्य तु ।
(वप्रम्, केदारः, क्षेत्रम्, )

तीरम् - कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ।
( कूलम्, रोधः, तीरम्, प्रतीरम्, तटम् )

## धातुरूपाणि

**भू धातोः (परस्मैपदी) लङ् रूपाणि ।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अभवत् | अभवताम् | अभवन् |
| **मध्यमपुरुषः** | अभवः | अभवतम् | अभवत |
| **उत्तमपुरुषः** | अभवम् | अभवाव | अभवाम । |

## शब्दकोशः

| **पदम्** | **संस्कृतम्** | **कैरली** | **आङ्गलम्** |
|---|---|---|---|
| अटित्वा | भ्रमणं कृत्वा | ചുറ്റിക്കറങ്ങിയിട്ട് | Having wandered |
| अनारतम् | सर्वदा | ഇടതടവില്ലാതെ | Continuously |
| अवकरः | अवशिष्टम् | മാലിന്യം | Waste |
| आक्रन्दनम् | रोदनम् | കരച്ചിൽ | Crying |
| केदारः | कृषिक्षेत्रम् | വയൽ | Field |
| चञ्चुः | त्रोटः | ചുണ്ട് | Beak |
| बकः | शुक्लवायसः | കൊക്ക് | Crane |
| रवः | शब्दः | ശബ്ദം | Sound |
| शावकः | शिशुः | കുഞ്ഞ് | Young one |
| सरः | तडागः | തടാകം | Lake |

## किमधिगतम् ।

| पठनप्रवर्तनानि | स्वीकृतम् | भागिकतया स्वीकृतम् | प्रगत्यर्थं यत्नः करणीयः |
|---|---|---|---|
| उच्चैर्वाचनम् । | | | |
| प्रश्नोत्तरक्रीडाचालनम् । | | | |
| समानपदानि चित्वा पट्टिकापूरणम् । | | | |
| कथास्तम्भक्रमीकरणम् | | | |
| अव्ययानां लेखनम् । | | | |
| कथावतारणम् । | | | |
| प्रवृत्तिमेखलाः वृत्तीः च अधिकृत्य लेखनम् । | | | |
| नामपदानां क्रियापदानां च पट्टिकाकरणम् । | | | |
| अनुष्टुप् श्लोकस्य विवेचनम् । | | | |
| जैवावकरं अजैवावकरं च विविच्य पट्टिकाकरणम् । | | | |
| व्याकरणविशेषस्य विशदीकरणम् । | | | |

प्रथमे एकके परिस्थितिविषयकम् एकं गीतं कथां च अपठाम। द्वितीये एकके संस्कृतसाहित्यात् पुरातनं नवीनं च पन्थानं परिचिनुमः ।

# एककम् २
# साहितीयम्

## आमुखम्

संस्कृतसाहित्यम् अतिविपुलं भवति । काव्यं, नाटकं, कथा, अख्यायिका इत्यादयः विविधाः शाखाः सन्ति । प्राचीनकविषु महाकविः कालिदासः समुन्नतं स्थानम् अलङ्करोति । एवं केरलीयः मेल्पुत्तूर् नारायणभट्टः कवित्वेन पाण्डित्येन च समुन्नतं स्थानं वहति। एतयोः कृतिभ्यः स्वीकृताः काव्यांशाः अत्र सन्निवेशिताः । आधुनिकसंस्कृतसाहित्ये 'रावणो नैव राभणः' इति ईहामृगः श्रद्धेयः भवति । तस्माच्च कश्चिदंशः अस्मिन् एकके समायोजितः ।

# तृतीयः पाठः
# काव्यमञ्जरी

**पाठप्रवेशः**

| अ | आ |
|---|---|
| कुमारसम्भवम् | भज गोविन्दम् |
| रघुवंशम् | विष्णुसहस्रनामम् |
| शिशुपालवधम् | सौन्दर्यलहरी |
| किरातार्जुनीयम् | नारायणीयम् |
| नैषधीयचरितम् | क्षमापणसहस्रम् |

पट्टिकाम् अधिकृत्य कक्ष्यायां चर्चा ।

**आमुखम्**

संस्कृतसाहित्ये बहवः काव्यभेदाः सन्ति - महाकाव्यं, स्तोत्रकाव्यं, सन्देशकाव्यमित्यादयः। अस्मिन् पाठभागे कालिदासविरचितमहाकाव्यद्वयात्, मेल्पुत्तूर् नारायणभट्टपादेन विरचितात् नारायणीयात् च सङ्कलिताः चत्वारः श्लोकाः सन्ति।

१. महाकविकालिदासविरचिते कुमारसम्भवमहाकाव्ये प्रथमसर्गे विद्यते अयं श्लोकः। अत्र पार्वत्याः बाल्यकालं वर्णयति।

मन्दाकिनीसैकतवेदिकासु
सा कन्दुकैः कृत्रिमपुत्रकैश्च।
रेमे मुहुर्मध्यगता सखीनां
क्रीडारसं निर्विशतीव बाल्ये॥

(कुमारसम्भवम्-प्रथमसर्गः-२८)



**पदच्छेदः**

कृत्रिमपुत्रकैश्च - कृत्रिमपुत्रकैः + च
निर्विशतीव - निर्विशती + इव

**विग्रहः**

कृत्रिमपुत्रकैः - कृत्रिमश्च असौ पुत्रकः च कृत्रिमपुत्रकः, तैः कृत्रिमपुत्रकैः ।
क्रीडारसं - क्रीडायाः रसः क्रीडारसः, तं क्रीडारसम् ।
मध्यगता - मध्ये गता ।

| **अन्वय :** | | **अर्थः** |
|---|---|---|
| सा | - | पार्वती |
| बाल्ये | - | शैशवे |
| क्रीडारसं | - | खेलारुचिम् |
| निर्विशती इव | - | अनुभवन्ती इव |
| सखीनाम् | - | वयस्यानाम् |
| मध्यगता | - | मध्ये तिष्ठन्ती |
| मन्दाकिनीसैकतवेदिकासु | - | गङ्गापुलिनभूमिषु |
| कन्दुकैः | - | क्रीडनकैः |
| कृत्रिमपुत्रकैः | - | कृत्रिमपाञ्चालिकाभिः |
| मुहुः | - | पुनः |
| रेमे | - | क्रीडति स्म । |

**सारांशः**

पार्वती बाल्ये (शैशवे) क्रीडारसम् अनुभवन्ती इव स्वसखीनां मध्ये स्थिता गङ्गायाः पुलिनेषु कन्दुकैः पुत्तलिकाभिः च क्रीडति स्म ।

**वृत्तम्** – **इन्द्रवज्रा**

लक्षणम् - स्यादिन्द्रवज्रा यदि तौ जगौ गः ।

त त ज गु गु
– – ∪/ – – ∪/∪ – ∪/ – –
मन्दाकि/ नीसैक/ त वेदि/ कासु

त त ज गु गु
– – ∪/ – – ∪/∪ – ∪/ – –
सा कन्दु/ कैः कृत्रि/ मपुत्र/ कैश्च ।

रेमे मुहुर्मध्यगता सखीनां
क्रीडारसं निर्विशतीव बाल्ये ॥

अत्र प्रतिपादं तगण-तगण-जगणाः गुरुद्वयं च क्रमशः भवन्ति इत्यतः इन्द्रवज्रा ।

**अलङ्कारः - उत्प्रेक्षा**

लक्षणम् - संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।

अस्मिन् पद्ये क्रीडारसम् अनुभवन्ती इव पार्वती कन्दुकैः मृण्मयाभिः पुत्तलिकाभिश्च रेमे इत्युक्तम्। अतः उत्प्रेक्षालंङ्कारः।

**२.** कविकुलगुरुणा कालिदासेन विरचिते कुमारसम्भवे पञ्चमसर्गे श्लोकोऽयं वर्तते। शिवप्राप्तये पार्वती कठिनं तपः करोति। तदा पार्वतीं परीक्षितुं वटुरूपेण शिवः तपोवनम् आगच्छति। तयोः मिथः भाषणम् एव अयं सन्दर्भः।



अपि क्रियार्थं सुलभं समित्कुशम्
जलान्यपि स्नानविधिक्षमाणि ते।
अपि स्वशक्त्या तपसि प्रवर्त्तसे
शरीरमाद्यं खलु धर्मसाधनम्॥

(कुमारसम्भवम् - पञ्चमसर्गः ३२)

**पदच्छेदः**

| | | |
|---|---|---|
| जलान्यपि | - | जलानि + अपि |
| शरीरमाद्यम् | - | शरीरम् + आद्यम् |

**विग्रहः**

| | | |
|---|---|---|
| समित्कुशम् | - | समिधः कुशाः च तेषां समाहारः समित्कुशम्। |
| क्रियार्थम् | - | क्रियायै इदम्। |
| स्वशक्त्या | - | स्वस्य शक्तिः स्वशक्तिः, तया स्वशक्त्या। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अपि ? | - | किम् ? |
| क्रियार्थं | - | होमादिक्रियायै |
| समित्कुशं | - | दर्भादयः |
| सुलभम् | - | सुप्रापम् |
| अपि ? | - | किम् ? |
| जलानि | - | आपः |
| ते | - | तव |
| स्नानविधिक्षमाणि | - | स्नानयोग्यानि |
| अपि ? | - | किम् ? |
| स्वशक्त्या | - | स्वबलानुसारम् |
| तपसि | - | तपःकर्मणि |
| प्रवर्त्तसे | - | करोषि |
| खलु | - | निश्चितम् |
| शरीरम् | - | देहः |
| आद्यं | - | प्रथमम् |
| धर्मसाधनम् | - | धर्मसम्पादनोपायः। |

**सारांश:**

त्वं होमादिकरणाय यज्ञकाष्ठानि दर्भाश्च सुखेन लभसे किम् ? त्वं स्नानयोग्यं जलं लभसे किम् ? त्वं सामर्थ्यानुसारेणैव तपस्यामाचरसि किम् ? (न तु शरीरमत्यन्तं पीडयित्वा)। यतो देहः धर्माचरणे मुख्योपकरणम् अस्ति।

**वृत्तम् – वंशस्थम्**

लक्षणम् - जतौ तु वंशस्थमुदीरितं जरौ।

ज त ज र
U - U / - - U / U - U / - U -
अपि क्रि/ यार्थं सु/ लभं स/ मित्कुशम्

ज त ज र
U - U / - - U / U - U / - U -
जलान्य/ पि स्नान/ विधिक्ष/ माणि ते।

अपि स्वशक्त्या तपसि प्रवर्त्तसे
शरीरमाद्यं खलु धर्मसाधनम्॥

अत्र प्रतिपादं जगण-तगण-जगण-रगणाः क्रमशः भवन्ति इत्यतः जतौ जरौ इति लक्षणानुसारेण वंशस्थं नाम वृत्तम्।

**३.** महाकविना कालिदासेन विरचितस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽयं श्लोकः। दिलीपसिंहयो: सम्भाषणसन्दर्भे भवति अयं श्लोकः।

कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य।
अथैनमद्रेस्तनया शुशोच
सेनान्यमालीढमिवासुरास्त्रैः॥

(रघुवंशम् - द्वितीयसर्गः ३१)



**पदच्छेदः**

| | | |
|---|---|---|
| वन्यद्विपेनोन्मथिता | - | वन्यद्विपेन + उन्मथिता |
| त्वगस्य | - | त्वक् + अस्य |
| अथैनम् | - | अथ + एनम् |
| अद्रेस्तनया | - | अद्रेः + तनया |
| आलीढमिव | - | आलीढम् + इव |

**विग्रहः**

| | | |
|---|---|---|
| असुरास्त्रैः | - | असुराणाम् अस्त्राणि असुरास्त्राणि, तैः असुरास्त्रैः । |

| **अन्वयः** | | **अर्थः:** |
|---|---|---|
| कदाचित् | - | एकदा |
| कण्डूयमानेन | - | घर्षयता |
| वन्यद्विपेन | - | वन्यगजेन |

| | | |
|---|---|---|
| अस्य | - | देवदारोः |
| त्वक् | - | वत्कलं |
| उन्मथिता | - | उत्पाटिता |
| अथ | - | अनन्तरम् |
| एनम् | - | एतम् |
| अद्रेः | - | हिमाचलस्य |
| तनया | - | पुत्री |
| असुरास्त्रैः | - | दैत्यशरैः |
| आलीढम् | - | क्षतम् |
| सेनान्यम् | - | कार्तिकेयम् |
| इव | - | यथा |
| एनं | - | देवदारुम् |
| शुशोच | - | दुःखिता अभूत्। |

**सारांशः**

एकदा केनापि वन्यगजेन स्वगात्रं घर्षयता अस्य देवदारुवृक्षस्य वल्कलम् उत्पाटितम्। तद्दृष्ट्वा पार्वती दैत्यास्त्रैः क्षतं स्वपुत्रं स्कन्दं यथा शुशोच तथैव एनमपि शुशोच।

**वृत्तम्** - **इन्द्रवज्रा**

**अलंकारः** - **उपमा**

**लक्षणम्** - उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।

अत्र चतुर्थपादे असुरास्त्रैः आलीढं सेनान्यम् इव इति वर्णना दृश्यते। अतः गतत्वग् देवदारुः पूर्वोक्तं सेनान्यमिव भवतीति उक्तेः उपमा नाम अलङ्कारः।

## ४. श्रीमता मेल्पुत्तूर् नारायणभट्टपादेन विरचितस्य नारायणीयकाव्यस्य एकोनपञ्चाशत्तमदशकात् उद्धृतः अयं श्लोकः। वृन्दावनस्य सौन्दर्यवर्णना एव अत्र सन्दर्भः।



निरीक्ष्य वृन्दावनमीश! नन्दत्-
प्रसूनकुन्दप्रमुखद्रुमौघम्।
अमोदथाः शाद्वलसान्द्रलक्ष्म्या
हरिन्मणीकुट्टिमपुष्टशोभम् ॥

(नारायणीयम् - दशकम् ४९-५)

**पदच्छेदः**

वृन्दावनमीश - वृन्दावनम् + ईश

**अन्वय:** | **अर्थ:**

| अन्वय: | | अर्थ: |
|---|---|---|
| हे ईश ! | - | हे देव ! |
| प्रसूनकुन्दप्रमुखद्रुमौघम् | - | कुसुमितैः कुन्दादीनामाश्रयवृक्षैः (सहित)-वृक्षसमूहैः च उपेतम् |
| शाद्वलसान्द्रलक्ष्म्या | - | हरितसस्यभूषितत्वात् मनोहारिण्या |
| हरिन्मणीकुट्टिमपुष्टशोभम् | - | मरतकमणिखचितवेदिकाभिः अतीव शोभमानम् |
| नन्दत् | - | आनन्दं जनयत् |
| वृन्दावनं निरीक्ष्य | - | वृन्दावनं दृष्ट्वा |
| अमोदथाः | - | सन्तुष्टः अभवः । |

**सारांश:**

हे भगवन् ! कुसुमितैः विशिष्टवृक्षैः पूर्णं, हरितवर्णैः सस्यैः शोभमानम्, अतः एव मरतकमणिभिः आपादितसौन्दर्याभिः, वेदिभिश्च उपेता इव आनन्दं जनयद् वृन्दावनं दृष्ट्वा भवान् अत्यन्तं सन्तोषम् आप ।

**वृत्तम्** - **उपेन्द्रवज्रा**

**लक्षणम्** - **उपेन्द्रवज्रा जतजास्ततो गौ**

ज त ज गु गु
U - U / - - U / - U U / - -
निरीक्ष्य/ वृन्दाव/ नमीश/ नन्दत्

अत्र पद्ये प्रतिपादं जगण-तगण-जगणाः गुरुद्वयं च क्रमेण भवन्ति इत्यतः उपेन्द्रवज्रा ।

## व्याकरणकार्यम्

**अव्ययपरिचय:**

अपि, खलु, न, तु, च, विना, नाना, पृथक् इत्यादीनि पदानि अव्ययानि ।

**अव्ययलक्षणम्**

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

विभक्तिभेदेऽपि अव्ययानां रूपभेदो न भवतीति कारणात् एतानि अव्ययानि इत्युच्यन्ते ।

## पठनप्रवर्तनानि

**व्याख्यानं पठित्वा पाठभागस्थश्लोकानाम् अन्वयं चर्चित्वा लिखतु।**

**श्रद्धेयाः अंशाः -**

चर्चा ।
श्लोकस्य आशयग्रहणम्।
अन्वयलेखनम्।

**सङ्घे चर्चां कृत्वा पाठभागस्थश्लोकानाम् आशयं स्वीकृत्य लिखतु।**

**श्रद्धेयौ अंशौ -**

व्याख्यानं पठित्वा चर्चा।
आशयलेखनम्।

**अधोदत्तौ श्लोकौ पठित्वा कः अलङ्कारः इति लक्षणसमन्वयपूर्वकं लिखतु।**

**क)** मन्दाकिनी..................
.................. बाल्ये ॥

**ख)** कण्डूयमानेन..................
सेनान्यमालीढमिवासुरास्त्रैः ।।

**श्रद्धेयौ अंशौ -**

व्याख्यानस्य पठनं चर्चा च ।
लक्षणसमन्वयपूर्वकं समर्थनम्।

**अधोदत्तानां श्लोकानां गणनिर्णयं कृत्वा लक्षणसमन्वयपूर्वकं वृत्तं समर्थयतु।**

**क)** मन्दाकिनीसैकतवेदिकासु
सा कन्दुकैः कृत्रिमपुत्रकैश्च।
रेमे मुहुर्मध्यगता सखीनां
क्रीडारसं निर्विशतीव बाल्ये ॥

ख)　　अपि क्रियार्थं सुलभं समित्कुशम्
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्त्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥

ग)　　निरीक्ष्य वृन्दावनमीश! नन्दत्
प्रसूनकुन्दप्रमुखद्रुमौघम् ।
अमोदथाः शाद्वलसान्द्रलक्ष्म्या
हरिन्मणीकुट्टिमपुष्टशोभम् ॥

**श्रद्धेयाः अंशाः**

आलापनम् ।
गणनिर्णयः ।
वृत्तनिर्धारणम् ।
समर्थनम् ।



**तालसमन्वितं श्लोकं कक्ष्यायाम् आलपतु ।**

**श्रद्धेयाः अंशाः -**

उच्चारणशुद्धिः ।
तालबोधः ।
आलापनसामर्थ्यम् ।



**अधोदत्तपद्यभागात् अव्ययानि चित्वा लिखतु ।**

अपि स्वशक्त्या तपसि प्रवर्त्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥

**श्रद्धेयाः अंशाः -**

व्याकरणकार्यं पठित्वा अव्ययज्ञानसम्पादनम् ।
निर्दिष्टभागात् अव्ययानां चयनम् ।
टिप्पणीपुस्तके लेखनम् ।

## अमरकोशः

सैकतम् - तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्।
(पुलिनम्, सैकतम्, सिकतामयम्)

शरीरम् - अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम्।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः॥
(कलेवरम्, गात्रम्, वपुः, संहननम्, शरीरम्, वर्ष्म, विग्रहः)

द्विपः - दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः
मतङ्गजो गजो नागः कुञ्जरो वारणः करी॥
(दन्ती, दन्तावलः, हस्ती, द्विरदः, अनेकपः, द्विपः, मतङ्गजः, गजः, नागः, कुञ्जरः, वारणः, करी)

प्रसूनम् - स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्।
(सुमनसः, पुष्पम्, प्रसूनम्, कुसुमम्, सुमम्)

सेनानीः - कार्तिकेयो महासेनः शरजन्मा षडाननः।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः॥
(कार्तिकेयः, महासेनः, शरजन्मा, षडाननः, पार्वतीनन्दनः, स्कन्दः, सेनानीः, अग्निभूः, गुहः)

## धातुरूपाणि

**रम् धातोः आत्मनेपदी लिट् रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | रेमे | रेमाते | रेमिरे |
| **मध्यमपुरुषः** | रेमिषे | रेमाथे | रेमिध्वे |
| **उत्तमपुरुषः** | रेमे | रेमिवहे | रेमिमहे। |

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | आङ्गलम् |
|---|---|---|---|
| कुट्टिमः | वेदिका | വേദി | Stage |
| कुन्दम् | मल्लिका | മുല്ല | Jasmine |
| तनयः | पुत्रः | മകൻ | Son |
| द्विपः | गजः | ആന | Elephant |
| प्रसूनम् | पुष्पम् | പൂവ് | Flower |
| मुहुः | पुनः | വീണ്ടും | Again |
| रेमे | अक्रीडत् | കളിച്ചു | Played |
| शरीरम् | कायः | ശരീരം | Body |
| शाद्वलः | हरितम् | പച്ചപ്പുള്ള | Green |
| सैकतम् | पुलिनम् | മണൽത്തിട്ട | Sand bank |

## अनुबन्धः

### संस्कृतकाव्यानि

**इतिहासकाव्ये**

रामायणम् - वाल्मीकिः
महाभारतम् - वेदव्यासः

**महाकाव्यानि**

बुद्धचरितम् - अश्वघोषः
सौन्दरनन्दम् - अश्वघोषः
जाम्बवतीजयम् - पाणिनिः
भट्टिकाव्यम् - भट्टिः

**खण्डकाव्यानि**

ऋतुसंहारः - कालिदासः
मेघदूतम् - कालिदासः

**चम्पूकाव्यानि**

चम्पूरामायणम् - भोजदेवः
महाभारतचम्पू - अनन्तभट्टः
यशस्तिलकचम्पू - सोमदेवः

**गद्यकाव्यानि**

कादम्बरी, हर्षचरितम् - बाणभट्टः
दशकुमारचरितम् - दण्डी
अवन्तिसुन्दरीकथा - दण्डी
वासवदत्ता - सुबन्धुः

**स्तोत्रकाव्यानि**

मयूरशतकम् - मयूरः
सौन्दर्यलहरी - श्रीशङ्कराचार्यः
शिवानन्दलहरी - श्रीशङ्कराचार्यः

**केरलीयैः कृतानि काव्यानि**

श्रीकृष्णविलासम् - सुकुमारकविः
केरलोदयम् - डा. के. एन्. एषुत्तच्छन्
क्रिस्तुभागवतम् - प्रोफ. पी. सी. देवस्य
नवभारतम् - मुतुकुलम् श्रीधरः
विश्वभानुः - डा.पी. के. नारायणपिल्ल
बाहुकविजयम् - प्रोफ. ई. एन्. नारायणः
सारस्वतम् - प्रोफ. विष्णुनम्पूतिरि

**अनूदितानि काव्यानि**

सीताविचारलहरी - एन्. गोपालपिल्ल
प्ररोदनम् - के. वासुदेवगणकः

## किमधिगतम्।

| पठनप्रवर्तनानि | स्वीकृतम् | भागिकतया स्वीकृतम् | प्रगत्यर्थं यत्नः करणीयः |
|---|---|---|---|
| श्लोकानाम् अन्वयलेखनम्। | | | |
| श्लोकानाम् आशयलेखनम्। | | | |
| अलङ्कारनिर्धारणम्। | | | |
| वृत्तनिर्धारणम्। | | | |
| श्लोकानाम् आलापनम्। | | | |
| अव्ययानां चयनम्। | | | |

दृश्यकाव्यानां रङ्गावतारणम् अधिकृत्य चर्चां करोतु।

# चतुर्थः पाठः
# जन्मदिनोपहारः

पाठप्रवेशः

रामयणकाव्यमाश्रित्य प्रादेशिकभाषासु विरचिताः कृतीः अधिकृत्य चर्चां करोतु ।

**आमुखम्**

संस्कृतसाहित्यं दृश्यं श्रव्यमिति द्विधा विभक्तं भवति। दृश्यकाव्यानि रूपकाणि इति सामान्यतया उच्यन्ते। रूपकाणि दशविधानि - नाटकम्, प्रकरणम्, भाणः, प्रहसनम्, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः चेति।

अयं पाठभागः"रावणो नैव राभणः" इति ईहामृगात् उद्धृतः भवति। अस्य रूपकस्य कर्ता अनन्तपुरस्थसंस्कृतमहाविद्यालयस्य साहित्यविभागाद् विरतः प्रोफ. एम्. मुरलीधरन् नायर् महोदयः भवति। अत्र नाटककारः रामायणकथायाः आशयं स्वीकृत्य स्वतन्त्ररूपेण कानिचन परिवर्तनानि अकरोत्।



(दक्षिणहस्ते बद्धपट्टिकः रावणः स्वप्रकोष्ठे उपविशति। ततः प्रविशति विभीषणदुहिता कला अष्टवर्षदेशीया बालिका।)

रावण: - (तां दृष्ट्वा सहर्षम् आत्मगतम्) विमनस्कानां नृणां शिशुदर्शनं नाम नवमस्ति मधुरं भेषजम्। (प्रकाशम्) एहि पुत्रि! एह्येहि।

कला - अप्प, ननु विस्मृतं भवता अद्य दिवस: क इति ?

रावणः - विस्मरणस्य का वार्ता, नन्वद्य रविवासरः ?

कला - तर्हि भवता नूनं विस्मृतम्, किं करोमि ?

रावण: - अत्र त्वया जितोऽहं, कथय अद्य को विशेष इति।

कला - अद्य हि मम नववार्षिकं जन्मदिनं भवति, यद् अप्पा विस्मृतवान् किल ? तद् देहि मे मम पारितोषिकम्।

रावण: - सत्यम्। एतन्मया व्यग्रतया विस्मृतमभूत्। भवतु अधुनैव तन्निर्वहामि।

(कला स्मेरालङ्कृतमुखी हस्तं प्रसारयति)



रावणः - नैवम्। नयने निमील्य दक्षिणं हस्तं प्रसारय।

कला - (तथा कृत्वा) मया हस्तः प्रसारितः। ननु देहि। (रावणः रत्नभूषणमादाय तस्याः प्रसारिते हस्ते निक्षिपति।)

कला - (दृष्ट्वा सहर्षम्) अप्प,अत्यर्थं रोचते मह्यम् इयं मणिमाला।

रावण: - अधुना दर्शय तत्, यत् त्वया मदर्थमानीतं तव हस्ते स्थितं किमिति।

कला - इदं दर्शयामि। नयने पिधाय प्रसार्यतां भवतो दक्षिणो हस्तः।

रावण: - (नयने पिधाय अबोधपूर्वं दक्षिणहस्तं प्रसारयति। ततः उदितरुजो झटिति वक्रितमुखो जायते। तत: तस्य हस्ते पट्टिकाबन्धनं दृष्ट्वा)

कला - अप्प, क्षतस्ते दक्षिणो हस्तः। अप्प, किमेतत्?

रावणः - (विद्युज्जिह्वमीक्षते,ततः स जाड्यस्मितपूर्वकं कलां प्रति।) ननु त्वं मेधाविनी बालिका। तत् स्वयमूहित्वा कथय। पश्यामस्तावत्।

कला - जानाम्येवाहम्। विनता मह्यमवदद् यदशोकवनिकायामुपनतम्।



रावणः - (चकितो जायते, ततः ससम्भ्रमम्) किमभवद् वनिकायाम्? किमकथयत् सा तुभ्यम्।

कला - यद् भवान् इक्षुबुद्ध्या कण्टकिनीं वेत्रलतां प्रगाढं परिगृहीतवान् येन ततो क्षतहस्तो जात इति।

(रावणः समाश्वास्य दीर्घं निश्वसिति)

रावण - आम् आम् एवमेव, एवमेव।

कला - अप्प, एवं क्षतहस्तो भवान् नेदिष्ठे महायुद्धे कथं करिष्यति?

रावणः - युद्धम् आगच्छतीति त्वां कोऽवदत्?

कला - न कोऽपि। ननु युद्धम् एव भवतः एको विनोदोपायः। सदैव भवान् यस्मै कस्मैचिद् युद्धं वा युद्धहेतुं कुर्वन्नास्ते। अतो वदामि।

रावणः - तिष्ठ तत्र दुर्ललिते, त्वामद्याहं...

(इति लीलया प्रहर्तुमुद्युक्त अबोधपूर्वं दक्षिणहस्तमुद्यम्य समुत्पन्नरुजः झटिति 'हा' इति हस्तं व्यावर्तयति, रुजापीडितः सः 'हा' इति वामहस्तेन दक्षिणहस्तं परामृशति।)

कला - (नाट्येन तं परिहृत्य) अप्प, हस्तः, तव हस्तः (हसित्वा) अवेक्ष्यतां भवतो व्रणितो हस्तः। (ततः तया आनीतं वस्तु पीठे न्यस्य पलाय्य गच्छति कला। रावणः पीडां नाटयति।)

**पदच्छेदः**

| | | |
|---|---|---|
| एह्येहि | - | एहि + एहि |
| नवमस्ति | - | नवम् + अस्ति |
| नन्वद्य | - | ननु + अद्य |
| जितोऽहं | - | जितः + अहम् |
| एतन्मया | - | एतत् + मया |
| विस्मृतमभूत् | - | विस्मृतम् + अभूत् |

| | | |
|---|---|---|
| अधुनैव | - | अधुना + एव |
| किमभवत् | - | किम् + अभवत् |
| कोऽवदत् | - | कः + अवदत् |
| सदैव | - | सदा + एव |
| कुर्वन्नास्ते | - | कुर्वन् + आस्ते |
| त्वामद्याहम् | - | त्वाम् + अद्य+ अहम् |
| प्रहर्तुमुद्युक्तः | - | प्रहर्तुम् + उद्युक्तः |
| जानाम्येवाहम् | - | जानामि + एव + अहम् |
| एवमेव | - | एवम् + एव |
| ततो क्षतहस्तः | - | ततः + क्षतहस्तः |
| उद्युक्त अबोधपूर्वम् | - | उद्युक्तः + अबोधपूर्वम् |

**विग्रहः**

| | | |
|---|---|---|
| क्षतहस्तः | - | क्षतो हस्तो यस्य सः। |
| विमनस्कानां | - | विगतं मन: येषां ते विमनसः, ते एव विमनस्काः, तेषाम्। |
| शिशुदर्शनम् | - | शिशो: दर्शनम्। |
| स्मेरालङ्कृतमुखी | - | स्मेरेण अलङ्कृतं मुखं यस्याः सा। |
| मदर्थम् | - | मह्यं इदम्। |
| दक्षिणहस्त: | - | दक्षिणो हस्तः। |
| वक्रितमुख: | - | वक्रितं मुखं यस्य सः। |
| कण्टकिनीम् | - | कण्टकानि सन्ति अस्याः, अस्यां वा कण्टकिनी, तां कण्टकिनीम्। |
| रुजापीडितः | - | रुजया पीडितः। |

**क्रियापदपरिचयः**

प्रसारयति - प्र इत्युपसर्गपूर्वक 'सृ' धातोः ण्यन्तात् कर्तरि (परस्मैपदी) लट्, प्र. पु. ए.व।

देहि - दाञ् धातोः (परस्मैपदी) लोट्, म. पु. ए. व।

ददाति - दाञ् धातोः (परस्मैपदी) लट्, प्र. पु. ए. व।

रोचते - रुच् धातोः (आत्मनेपदी) लट्, प्र. पु. ए.व।

## व्याकरणकार्यम्

**वर्णानां स्थानानि**



| | | |
|---|---|---|
| अकुहविसर्जनीयानां कण्ठ: | - | अवर्ण:, कवर्ग:, हकार:, विसर्गश्च इत्येते कण्ठ्या: । |
| इचुयशानां तालु | - | इवर्ण:, चवर्ग:, यकार:, शकारश्च तालव्या: । |
| ऋटुरषाणां मूर्धा | - | ऋवर्ण:, टवर्ग:, रेफ:, षकारश्च मूर्धन्या: । |
| ऌतुलसानां दन्ता: | - | ऌवर्ण: ,तवर्ग:, लकार:, सकारश्च दन्त्या: । |
| उपूपध्मानीयानामोष्ठौ | - | उवर्ण:, पवर्ग:, उपध्मानीयश्च ओष्ठ्या: । ≍प ≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश:उपध्मानीय: । |
| ञमङणनानां नासिका च | - | वर्गान्त्यानां स्वस्ववर्गानुकूलस्थानानि नासिका च । |
| एदैतो: कण्ठतालु | - | ए, ऐ एतौ कण्ठ्यतालव्यौ । |
| ओदौतो: कण्ठोष्ठम् | - | ओ, औ एतौ कण्ठ्यौष्ठ्यौ । |
| वकारस्य दन्तोष्ठम् | - | वकारस्य दन्त: ओष्ठश्च । |
| जिह्वामूलीयस्य जिह्वामूलम् | - | ≍क ≍ख इति कखाभ्यां प्रागर्धविसर्गसदृश: जिह्वामूलीय: । |
| नासिकानुस्वारस्य | - | अनुस्वारस्य उच्चारणस्थानं नासिका इति ज्ञेयम् । यत्नो द्विधा - आभ्यन्तरो बाह्यश्च । आद्य: पञ्चधा । स्पृष्ट-ईषत्स्पृष्ट-ईषद्विवृत-विवृत-संवृतभेदात् । तत्र स्पृष्टं प्रयतनं स्पर्शानाम् ईषत्स्पृष्टमन्त:स्थानाम् । ईषद्विवृतमूष्मणाम् । विवृतं स्वराणाम् । ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायां तु विवृतमेव । |

## पठनप्रवर्तनानि ।

**पाठभागं भावानुसारं कक्ष्यायामवतारयतु । वीडियो मुद्रणं कृत्वा प्रदर्शयतु च ।**

**श्रद्धेया: अंशा: -**

संघे चर्चा ।

नाटकाभ्यास: ।

कक्ष्यायामवतारणम् ।

KITE Club इत्यस्य साहाय्येन वीडियो निर्माणं प्रदर्शनं च ।

**सन्दर्भानुसारं कथापात्राणां स्वभावं निरूपयतु। टिप्पणीं च लिखतु।**

**श्रद्धेयौ अंशौ -**

कथापात्रस्वभावमधिकृत्य चर्चा।

टिप्पणीलेखनम्।

**नाटकस्याशयम् अवगम्य कथारूपेण लिखतु कथयतु च।**

**श्रद्धेयाः अंशाः -**

पाठस्य सम्यक् पठनम्।

चर्चा।

कथालेखनम्।

**स्थानानुसारं यथोचितं वर्णान् योजयतु। कक्ष्यायाम् अवतारयतु।**

| | |
|---|---|
| १. ह ख अ। | तालु |
| २. य इ झ श। | मूर्धा |
| ३. र ढ ऋ ष ट। | कण्ठोष्ठम् |
| ४. ओ औ। | कण्ठतालु |
| ५. ए ऐ। | कण्ठः |

**श्रद्धेयौ अंशौ**

व्याकरणकार्यस्य पठनम्।

स्थानानुसारं लेखनम्।

## अमरकोशः

**दुहिता** - **आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी।**
**आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे।**
(आत्मजा, तनया, सूनू, सुता, पुत्री, ।)

**भूषणम्** - **विभ्राड्भ्राजिष्णुरोचिष्णू भूषणं स्यादलङ्क्रिया।**

**अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम् ।**
(अलङ्कारः , आभरणम् , परिष्कारः , विभूषणम् ।)

**नरः** - **मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।**
**स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥**
(मनुष्यः , मानुषः, मर्त्यः, मनुजः, मानवः, नरः, पुमान्, पञ्चजनः पुरुषः, पूरुषः, ना ।)

**भेषजम्** - **अनामयं स्यादारोग्यं चिकित्सा रुक्प्रतिक्रिया ।**
**भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥**
(भेषजम्, औषधम् , भैषज्यम्, अगदः, जायुः ।)

## धातुरूपाणि

**रुच् धातोः (आत्मनेपदी) लट् ।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | रोचते | रोचेते | रोचन्ते |
| **मध्यमपुरुषः** | रोचसे | रोचेथे | रोचध्वे |
| **उत्तमपुरुषः** | रोचे | रोचावहे | रोचामहे । |

**दाञ् धातोः (परस्मैपदी) लट् ।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | ददाति | दत्तः | ददति |
| **मध्यमपुरुषः** | ददासि | दत्थः | दत्थ |
| **उत्तमपुरुषः** | ददामि | दद्वः | दद्मः । |

## शब्दकोशः

| **संस्कृतम्** | **संस्कृतम्** | **कैरली** | **आङ्गलम्** |
|---|---|---|---|
| उदितरुजः | जातपीडः | വേദനയുള്ളയാൾ | Pained |

| | | | |
|---|---|---|---|
| कण्टकिनी | कण्टकवती | മുള്ളുള്ളത് | Having thorns |
| झटिति | शीघ्रम् | പെട്ടെന്ന് | Suddenly |
| दुहिता | पुत्री | മകൾ | Daughter |
| निमील्य | पिधाय | അടച്ചിട്ട് | Having closed |
| नृणाम् | नराणाम् | മനുഷ്യർക്ക് | For the people |
| नेदिष्ठे | अचिराद् भाविनि | ഉടൻ നടക്കാനിരിക്കുന്ന | Ensuing |
| परिगृहीतवान् | आश्लिष्टवान् | പുണർന്നു | Embraced |
| प्रगाढम् | गाढम् | മുറുകെ | Tightly |
| भेषजम् | औषधम् | മരുന്ന് | Medicine |
| मेधाविनी | बुद्धिमती | ബുദ്ധിയുള്ളവൾ | Intelligent |

## अनुबन्धः

**रामायणमाश्रित्य रचितानि नाटकानि ।**

१. अभिषेकनाटकम् - भासः
२. अद्भुतदर्पणम् - महादेवः
३. अनर्घराघवम् - मुरारिः
४. अञ्जनपावनजयम् - हस्तमालिः
५. बालरामायणम् - राजशेखरः
६. दूताङ्गदम् - सुभट्टः
७. हनुमन्नाटकम् - दामोदरः
८. जनकजानन्दनाटकम् - कलया लक्ष्मीनरसिंहः
९. महानाटकम् - मधुसूदनः
१०. महावीरचरितम् - भवभूतिः
११. उत्तररामचरितम् - भवभूतिः
१२. प्रतिमानाटकम् - भासः
१३. जानकीपरिणयः - रामभद्रदीक्षितः
१४. सीताराघवम् - रामपाणिवादः
१५. रघुविलासम् - रामचन्द्रसूरिः

**टिप्पणी -**

**ईहामृगः**

ईहामृगाख्ये रूपकभेदे प्रायेण चत्वारः अङ्काः भवन्ति। एकैकस्मिन् अङ्के अनेकं दृश्यं भवति। नायको वा प्रतिनायको वा गुणवतीं स्त्रियं स्वकीयां कर्तुं नानाविधं प्रयत्नं करोति। विटः नायकः नायिकां वशीकर्तुं महासाहसं करोति चेदपि अन्ते पराजितः भवति। एतादृशमितिवृत्तम् ईहामृगे भवति इति विवरणेभ्यः ज्ञायते।

**पाठभागेऽन्तर्भूतं साङ्केतिकशब्दद्वयम्।**

**आत्मगतम् / स्वगतम्।**

"अश्राव्यं खलु यद्वस्तु तदिह **स्वगतं** मतम्"।

**प्रकाशम्।**

"सर्वश्राव्यं **प्रकाशं** स्यात्"।

## किमधिगतम्

| पठनप्रवर्तनानि | स्वीकृतम् | भागिकतया स्वीकृतम् | प्रगत्यर्थं यत्नः करणीयः |
|---|---|---|---|
| नाटकावतारणं वीडियो प्रदर्शनं च। | | | |
| स्वभावनिरूपणम्। | | | |
| नाटकस्य कथारूपेण परिवर्तनम्। | | | |
| स्थानानुसारं वर्णानां योजनम्। | | | |

**शिशूनां निष्कलङ्कता सर्वेषां मनः आर्द्रयति। तद्वत् एव महात्मनां भूतदयापि।**

# एककम् ३

# मानवीयम्

## आमुखम्

बहूनां महात्मनां जन्मभूमिः भवति भारतम्। तेषां जीवनसन्दर्भाः अस्माकं प्रचोदकाः मार्गदर्शकाश्च भवन्ति। सुभाषितान्यपि जीवनपथदर्शकान्येव। सुभाषितं नाम सुष्ठु भाषितम्। अस्मिन्नेकके एकः पाठः महात्मनः श्री चट्टम्पिस्वामिनः जीवनसन्दर्भात् स्वीकृता एका घटना अस्ति। एवम् इतरः पाठः मानवजीवने अवश्यम् अनुवर्तनीयानि अमृतनिष्यन्दीनि कानिचन सुभाषितानि च।

# पञ्चमः पाठः

# दयालुः कुञ्जन् पिल्ल









एतैः चित्रैः यूयं किम् अवगच्छथ ?

एतादृशं साहाय्यं भवन्तः कदाचित् कृतवन्तः वा ? वदतु।

एतादृशाः भूतदयायुक्ताः एव सर्वे महात्मानः। एतादृशं कमपि महात्मानं भवन्तः जानन्ति वा ?

एतादृशां माहात्मनां प्रवर्तनानि समूहस्य उद्धारणाय भवन्ति। एतादृशां सामूहिकपरिष्कर्तॄणां नामानि वदतु।

**आमुखम्**

महापुरुषाणां जन्मना पवित्रेयं भूमिः। स्वजीवनम् इतरजीविनां समुद्धारणाय समर्पितवतां त्यागधनानां चरितम् अस्माकं प्रेरणायै भवति। चट्टम्पिस्वामी, श्रीनारायणगुरुदेवः, महात्मा अय्यङ्कालिः इत्यादयः केरलीयाः सामूहिकपरिष्कर्तारः भवन्ति। महापुरुषाणां भूतदया कीदृशी भवतीति अस्मिन् पाठे पठामः।



कस्यचिद् गृहस्य प्राङ्गणे बहवः पिपीलिकाः पङ्क्तिशः गमनागमनं कुर्वन्ति स्म। तेषां सञ्चारसौन्दर्यं समीक्ष्य कश्चिद्युवकः अङ्गणस्य कोणेऽतिष्ठत् च। निमेषाः अतीताः। आकाशो मेघावृतोऽभवत्। वातः वातुमारभत। प्रकृतेः परिणाममिमं दृष्ट्वा स युवकः अस्वस्थोऽभवत्। यदि क्षणेन वृष्टिः अभविष्यत् तर्हि अङ्गणे जलोपप्लवः अभविष्यत्। जलप्रवाहे सर्वाः पिपीलिकाः शिथिलाः भविष्यन्ति। आहारशेखरणार्थं गच्छन्तीनां तासां दुरवस्थां विचिन्त्य सः झटिति गृहान्तरालं प्रविश्य मातरम् अवदत् : - 'जननि! अल्पं तण्डुलचूर्णं ददातु' इति। युवकस्य पारवश्यं, त्वरां च विज्ञाय माता मुष्टिपूर्णं तण्डुलचूर्णं तस्मै अदात्। सः शीघ्रं प्राङ्गणं गत्वा तच्चूर्णम् अल्पशः अङ्गणादारभ्य गृहान्तरालपर्यन्तं वितरति स्म। निमिषेणैव पिपीलिकाः पुरोगतिं स्थगित्वा तण्डुलं खादितुम् अङ्गणाद्गृहान्तरालं प्राविशन्। वृष्टिजलात् पिपीलिकाः एवं संरक्ष्य स युवकः धन्यताम् अन्वभवत्। कुञ्ञन् पिल्ल नाम अयं युवकः पश्चात् चट्टम्पिस्वामी इति प्रथितः **जीवकारुण्यनिरूपणम्** इति ग्रन्थं रचितवान्।





| | | |
|---|---|---|
| नाम | : | चट्टम्पिस्वामी। |
| जननम् | : | १८५३ अगस्त् २५, कण्णम्मूला, तिरुवनन्तपुरं जिल्ला। |
| पितरौ | : | आनन्दशर्मा, नङ्ङ्म्मप्पिल्ल। |
| प्रशस्तिः | : | समूहपरिष्कर्ता, नवोत्थाननायकः, आध्यात्मिकाचार्यः। |
| रचना | : | 'जीवकारुण्यनिरूपणम्', 'प्राचीनमलयालम्' इत्यादयः (दृश्यताम् अनुबन्धः 1)। |
| मृत्युः | : | १९२४ मेय् ५ पन्मन आश्रमः, कोल्लम् जिल्ला। |

**पदच्छेदः**

| | | |
|---|---|---|
| कश्चिद्युवकः | - | कश्चित् + युवकः |
| कोणेऽतिष्ठत् | - | कोणे + अतिष्ठत् |
| मेघावृतोऽभवत् | - | मेघावृतः + अभवत् |
| अस्वस्थोऽभवत् | - | अस्वस्थः + अभवत् |
| तच्चूर्णम् | - | तत् + चूर्णम् |
| अङ्गणादारभ्य | - | अङ्गणात् + आरभ्य |
| निमिषेणैव | - | निमिषेण + एव |
| अङ्गणाद्गृहान्तरालम् | - | अङ्गणात् + गृहान्तरालम् |

**विग्रहः**

| | | |
|---|---|---|
| मेघावृतः | - | मेघैः आवृतः |
| तण्डुलचूर्णम् | - | तण्डुलस्य चूर्णम् |
| जलोपप्लवः | - | जलस्य उपप्लवः |
| मुष्टिपूर्णम् | - | मुष्टौ पूर्णम् |
| गृहान्तरालम् | - | गृहस्य अन्तरालम् |
| सञ्चारसौन्दर्यम् | - | सञ्चारस्य सौन्दर्यम् |
| गमनागमनम् | - | गमनं च आगमनं च । |

## व्याकरणविशेषः

**भूवादयो धातवः२/३/२२**

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।

उदा :- अभवत् (भू), भविष्यति (भू), अतिष्ठत् (स्था), आरभत (रभ्) ।

**लट् स्मे ३/२/२२८**

स्मशब्दयोगे भूतकालार्थः ।

वर्तमानकालिकक्रियापदेन (लट्) सह 'स्म' इत्यस्य प्रयोगे भूतकालार्थः सिद्ध्यति ।

उदा :- लिखति स्म - अलिखत्

वदति स्म - अवदत्

भवति स्म - अभवत्

प्रभवति स्म - प्राभवत्

## पठनप्रवर्तनानि

**पाठं भावानुसारम् उच्चैः वाचयतु ।**

**श्रद्धेयौ अंशौ -**

उच्चारणशुद्धिः ।
आशयावगमनम् ।

**क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि अव्ययानि पाठभागात् चित्वा टिप्पणीपुस्तके लिखतु ।**

| | क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|---|
| उदाः - | गत्वा | समीक्ष्य | वातुम् |
| | | | |

**श्रद्धेयौ अंशौ -**

पाठपुस्तकस्य वाचनम् ।
निर्दिष्टानाम् अव्ययानां विवेचनम् ।

**उदाहरणानुसारं पट्टिकां पूरयतु ।**

**उदा - अपठत् - पठति स्म**

अक्रीडत् - ...............
अपिबत् - ...............
अपश्यत् - ...............

**श्रद्धेयाः अंशाः -**

व्याकरकार्यस्य पठनम् ।
संघचर्चा ।
वर्तमालकाल-भूतकालप्रयोगावगमः ।
पट्टिकापूरणम् ।

**पाठे दत्तां जीवनचरितरूपरेखाम् अनुबन्धं च पठित्वा पूर्णवाक्यैः चट्टम्पिस्वामिनः जीवनचरितं स्ववाक्यैः लिखतु ।**

**श्रद्धेयाः अंशाः -**

जीवनचरितरूपरेखायाः पठनम् ।
अनुबन्धस्य पठनम् ।
संघचर्चा ।
पूर्णवाक्यैः लेखनम् ।

**पिपीलिकायाः कथां कक्ष्यायां कथयतु ।**

**श्रद्धेयाः अंशाः -**

पाठभागस्य पठनम् ।
संघचर्चा ।
कथाकथने अभ्यासः ।
कक्ष्यायाम् अवतारणम् ।

**समभावनासूचकानि सुभाषितानि समाहृत्य अवतारयतु ।**

**श्रद्धेयाः अंशाः -**

संघचर्चा ।
आशयरूपवत्करणम् ।
निर्दिष्टाशययुक्तानां सुभाषितानां चयनम् ।
कक्ष्यायाम् अवतारणम् ।

**अधोदत्तानां महात्मनां चित्राणि उचितसूक्तैः सह योजयतु।**



स्वातन्त्र्यमेवामृतम् स्वातन्त्र्यं चैव जीवनम्।
पारतन्त्र्यं मानिनां तु मृतेरपि भयानकम्॥



विद्याभ्यासात् ऋते केदारगमनं कथम्।



अनुकम्पामधुरेण पूर्णः स्यात् मानवः।



एका जातिः, एको धर्मः, एको देवः मनुष्याणाम्।

**अधोदत्ताः सूचनाः स्वीकृत्य जीवनचरितं लिखतु।**



नाम - पुन्नश्शेरि नम्पि नीलकण्ठशर्मा।
जन्म - १८५८ जूण् १७, पट्टाम्पि।
पितरौ - नारायणन् नम्पि, अच्युतत्त् नङ्ङय्या अन्तर्जनम्।
कर्मक्षेत्रम् - अध्यापकः।
रचनाः - ज्योतिश्शास्त्रसुबोधिनी, चमत्कारचिन्तामणिव्याख्या।
प्रसिद्धिः - संस्कृतपण्डितः, समूहपरिष्कर्ता।
देहवियोगः - १९३४ सप्तंबर् १४

**श्रद्धेयाः अंशाः -**

जीवनचरितरूपरेखायाः पठनम्।
संघचर्चा।
जीवनचरितलेखनरीतिः।
पूर्णवाक्यैः लेखनम्।

## अमरकोशः

| | | |
|---|---|---|
| वातः | - | नभस्वद्वातपवनपवमानप्रभञ्जनाः । |
| | | (नभस्वान्, वातः, पवनः, पवमानः, प्रभञ्जनः) |
| वृष्टिः | - | वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ । |
| | | (वृष्टिः, वर्षम्, अवग्राहः, अवग्रहः) |
| पङ्क्तिः | - | वीथ्यालिरावलिः पङ्क्तिः श्रेणी लेखास्तु राजयः । |
| | | (वीथी, आलिः, आवलिः, पङ्क्तिः, श्रेणी, लेखा, राजिः) |

## धातुरूपाणि

**आङ् पूर्वक गम् धातोः (परस्मैपदी) लृट्**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | आगमिष्यति | आगमिष्यतः | आगमिष्यन्ति |
| **मध्यमपुरुषः** | आगमिष्यसि | आगमिष्यथः | आगमिष्यथ |
| **उत्तमपुरुषः** | आगमिष्यामि | आगमिष्यावः | आगमिष्यामः । |

**दा धातोः (परस्मैपदी) लुङ्**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अदात् | अदाताम् | अदुः |
| **मध्यमपुरुषः** | अदाः | अदातम् | अदात |
| **उत्तमपुरुषः** | अदाम् | अदाव | अदाम । |

## शब्दकोशः

| **पदम्** | **संस्कृतम्** | **कैरली** | **आङ्गलम् ।** |
|---|---|---|---|
| अङ्गणम् | चत्वरम् | മുറ്റം | Courtyard |
| गृहान्तरालम् | गृहस्य अन्तर्भागः | വീടിന്റെ ഉൾവശം | Interior of the house |

| | | | |
|---|---|---|---|
| जलोपप्लवः | जलोत्पातः | വെള്ളപ്പൊക്കം | Flood |
| तण्डुलः | अन्नम् | അരി | Rice |
| पङ्क्तिः | श्रेणी | നിര | Row |
| पारवश्यम् | पराधीनता | പാരവശ്യം | Anxiety |
| पिपीलिका | पीलकः | ഉറുമ്പ് | Ant |
| वातः | वायुः | കാറ്റ് | Wind |
| विज्ञाय | ज्ञात्वा | അറിഞ്ഞിട്ട് | Having understood |
| वृष्टिः | वर्षम् | മഴ | Rain |
| शिथिलाः | भिन्नपङ्क्तयः | ചിതറിപ്പോയ | Scattered |
| स्थगित्वा | त्यक्त्वा | അവസാനിപ്പിച്ചിട്ട് | Having stopped |

## अनुबन्धः

**1. ചട്ടമ്പിസ്വാമിയുടെ കൃതികൾ**

- അദ്വൈതചിന്താപദ്ധതി
- ആദിഭാഷ
- പ്രാചീനമലയാളം
- സർവമതസാമരസ്യം
- ജീവകാരുണ്യനിരൂപണം
- വേദാധികാരനിരൂപണം
- ശ്രീചക്രപൂജ

**2. ചട്ടമ്പിസ്വാമിയുടെ മഹാവചനങ്ങൾ**

- ഗുണദോഷവിചാരം കൂടാതെ പ്രവൃത്തി പാടില്ല.
- ശൂദ്രനും വേദാഭ്യാസം ആകാം.
- മദ്യപാനം നിന്ദ്യമായൊരു സ്വഭാവദൂഷ്യം.
- പ്രപഞ്ചത്തിൽ പുരുഷനേക്കാൾ സ്ത്രീക്കാണ് പ്രാധാന്യം.
- ആരോടുതന്നെയായാലും സ്വാഭിപ്രായം തുറന്നു പറയണം.അതുകൊണ്ട് ഒരു ദോഷവുമില്ല.

## किमधिगतम्

| पठनप्रवर्तनानि | स्वीकृतम् | भागिकतया स्वीकृतम् | प्रगत्यर्थं यत्नः करणीयः |
|---|---|---|---|
| भावानुसारवाचनम् । | | | |
| अव्ययपरिचयः । | | | |
| पट्टिकापूरणम् । | | | |
| चट्टम्पिस्वामिनः जीवनचरितलेखनम् । | | | |
| पिपीलिकायाः कथावतारणम् । | | | |
| सुभाषितानाम् अवतारणम् । | | | |
| सूक्तैः योजनम् । | | | |
| नीलकण्ठशर्मणः जीवनचरितलेखनम् । | | | |

**नीतिबोधजनकानि कानिचन सुभाषितानि पठेम ।**

# षष्ठः पाठः

# सतां पन्थाः

**पाठप्रवेशः**

काकदृष्टिर्बकध्यानं
श्वाननिद्रा तथैव च।
अल्पाहारं जीर्णवस्त्र-
मेतद् विद्यार्थिलक्षणम्॥

पूर्वं पठितानि सुभाषितानि अधिकृत्य चर्चा।

**आमुखम्**

अस्माकं जीवने सुभाषितानि सन्मार्गं निर्दिशन्ति। जीवितविजयाय सुभाषितानि सहायकानि। नैतिकता - प्रायोगिकता - धार्मिकतादिगुणाः सुभाषितपठनेन आर्जयितुं शक्यन्ते। अनुभवार्जितं प्रकटितं च ज्ञानं सुभाषितम् इति उद्घोषयन्ति विज्ञाः। अस्मिन् पाठभागे नीतिबोधजनकानि चत्वारि सुभाषितानि आकलितानि।



**१** **अपकारिषु मा पापं चिन्तयस्व महामते।**
**स्वयमेव हि नश्यन्ति कूलजाता इव द्रुमाः ॥**

**पदच्छेदः**

| | | |
|---|---|---|
| कूलजाता इव | - | कूलजाताः + इव |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| (हे) महामते ! | - | (हे) महापुरुष ! |
| अपकारिषु | - | अधर्मिषु |
| पापम् | - | दुष्टकर्म |
| मा | - | नैव |
| चिन्तयस्व | - | विचारय |
| हि | - | यतः |
| (ते) | - | (अपकारिणः) |
| कूलजाताः | - | तीरे जाताः |
| द्रुमाः | - | वृक्षाः |
| इव | - | यथा |
| स्वयमेव | - | आत्मना एव |
| नश्यन्ति | - | नाशं प्राप्नुवन्ति । |

**सारांशः -**

ये अस्मभ्यं दोषं कुर्वन्ति तेभ्यः क्रोधः न कर्तव्यः। यतः तीरे जाताः वृक्षाः इव ते स्वयमेव नाशं प्राप्नुवन्ति।

**क्रियापदम् -** नश्यन्ति- नश् धातोः (परस्मैपदी) लट् प्र.पु.ब.व.।

२ आसनं शयनं वस्त्रं पानं भोजनमेव च।
तत्तत्समयमाज्ञाय मात्रे पित्रे नियोजयेत्॥

**पदच्छेदः**

| | | |
|---|---|---|
| भोजनमेव | - | भोजनम् + एव |
| तत्तत्समयमाज्ञाय | - | तत्तत्समयम् + आज्ञाय |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| आसनम् | - | आसन्दम् |
| शयनम् | - | शय्याम् |
| वस्त्रम् | - | वसनम् |
| पानम् | - | पेयम् |
| भोजनम् | - | भक्ष्यम् |
| एव च | - | निश्चयेन च |
| मात्रे | - | अम्बायै |
| पित्रे | - | जनकाय |
| तत्तत्समयं | - | यथासमयम् |
| आज्ञाय | - | ज्ञात्वा |
| नियोजयेत् | - | सज्जीकरोतु। |

**सारांशः -**

अस्माकं जीवनाय सर्वमपि दत्तवद्भ्यां पितृभ्याम् आवश्यकानि वस्तूनि अस्माभिः अवश्यं दातव्यानि एव। (तेषां सन्तोषः अस्माकम् उन्नतये भवति)।

**क्रियापदम्**

नियोजयेत् - निपूर्वकयुज्धातोः (परस्मैपदी) विधिलिङ् प्र.पु. ए.व.।

आज्ञाय - आङ्पूर्वकज्ञाधातोः ल्यबन्तम् अव्ययम्।

३ **किमत्र चित्रं यत्सन्तः परानुग्रहतत्पराः ।**
**न हि स्वदेहशैत्याय जायन्ते चन्दनद्रुमाः ॥**

**पदच्छेदः**

| | | |
|---|---|---|
| किमत्र | - | किम् + अत्र |
| यत्सन्तः | - | यत् + सन्तः |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| सन्तः | - | सत्पुरुषाः |
| परानुग्रहतत्परा : | - | इतरेषां हिते तत्पराः |
| अत्र | - | अस्मिन् विषये |
| चित्रम् | - | विचित्रम् |
| किम् ? | - | किम् ? (आश्चर्यं नास्ति) |
| यत् | - | यतो हि |
| स्वदेहशैत्याय | - | स्वस्य देहस्य शीतलतायै |
| चन्दनद्रुमाः | - | चन्दनवृक्षाः |
| न हि | - | नैव |
| जायन्ते | - | जनिं लभन्ते |
| खलु | - | एव । |

**विग्रह :**

परानुग्रहतत्पराः - परेषामनुग्रहः परानुग्रहः, तस्मिन् तत्पराः परानुग्रहतत्पराः ।

**सारांशः**

महापुरुषाः इतरेषाम् उन्नमने तत्पराः भवन्ति इत्यत्र अतिशयः नास्त्येव । यतो हि लोके चन्दनवृक्षाः स्वदेहशैत्याय न जनिं लभन्ते । यथा चन्दनवृक्षाः स्वेषां सुखाय चन्दनलेपं न उपयुञ्जते तथा महापुरुषाः स्वप्रवृत्तीः स्वगुणान् च स्वेषां ऐश्वर्याय न उपयुञ्जते ।

क्रियापदम् - जायन्ते - जन् धातोः (आत्मनेपदी) लट् प्र.पु.ब.व. ।

४

**नरत्वं दुर्लभं लोके**
**विद्या तत्र सुदुर्लभा ।**
**कवित्वं दुर्लभं लोके**
**शक्तिस्तत्र सुदुर्लभा ॥**

**पदच्छेदः**

शक्तिस्तत्र - शक्तिः + तत्र

**अन्वयः** **अर्थः**

लोके - जगति
नरत्वम् - मनुष्यत्वम्
दुर्लभम् - सुखेन न प्राप्यते
तत्र - नरत्वस्य लाभेऽपि
विद्या - ज्ञानम्
सुदुर्लभा - प्राप्तुमधिकं भाग्यमपेक्ष्यते (दुर्लभतरम्)
लोके - जगति
कवित्वं - काव्यनिर्माणपटुता
दुर्लभं - नाधिकेषु दृश्यं
तत्र - कवित्वे सत्यपि
शक्तिः - प्रतिभा (काव्यरचनायै अपेक्षिता)
सुदुर्लभा - अत्यन्तं दुर्लभा ।

**विग्रहः**

दुर्लभम् - दुःखेन लब्धुं शक्यम् ।

**सारांशः**

अस्मिन् विश्वे सौन्दर्यबोधादियुक्तं चिन्तनविवेचनादिगुणयुतं मनुष्यजन्म दुर्लभम् । नरजन्मनि लब्धेऽपि ज्ञानं नाधिको जनः प्राप्नोति । एवमेव लोके कवित्वं दुर्लभम् । सत्यपि कवित्वं कवने अपेक्षिता प्रतिभा अत्यन्तं दुर्लभा ।

## व्याकरणकार्यम्

**उपसर्गपरिचयः**

नि, अनु, परा, अप इत्यादयः क्रियाविशेषणरूपेण वर्तन्ते। अतः ते उपसर्गाः इत्युच्यन्ते।
उदा - अनुभवति, नियोजयति, उपजायते, प्राप्नोति इत्यादयः।

**'उपसर्गाः क्रियायोगे'** इति पाणिनीयसूत्रम्।

प्र-परा-सम्-अनु इत्यादयः प्रादयः।
ते क्रियायोगे उपसर्गासंज्ञाः स्युः।

## पठनप्रवर्तनानि

### श्लोकं व्याख्यानं च पठित्वा अन्वयं लिखतु।

**श्रद्धेयाः अंशाः -**

श्लोकानां व्याख्यानां च पठनम्।
संघचर्चा।
अन्वयलेखनम्।

### श्लोकं व्याख्यानं च पठित्वा श्लोकानाम् आशयं स्ववाक्यैः लिखतु।

**श्रद्धेयाः अंशाः -**

श्लोकस्य व्याख्यानस्य च पठनम्।
संघचर्चा।
स्ववाक्यैः आशयलेखनम्।

### सुभाषितानि सतालम् आलपतु।

**श्रद्धेयाः अंशाः -**

संघचर्चा।
अभ्यासः।
कक्ष्यायाम् अवतारणम्।

**अधोदत्ताशययुक्तान् श्लोकान् पाठभागात् चित्वा लिखतु।**

- अस्मिन् लोके कवित्वसिद्धिः अत्यन्तं दुर्लभा भवति।
- महात्मानः परानुग्रहतत्पराः।
- मातापित्रोः संरक्षणं पुत्रधर्मः भवति।
- अपकारं कृतवतां कृतेऽपि दोषचिन्ता न भवेत्।

**श्रद्धेयाः अंशाः -**

दत्ताशयानां पठनम्।
आशयावबोधः।
उचितचयनं लेखनं च।

**अनुबन्धे दत्तानि नीतिबोधयुक्तानि सुभाषितानि कक्ष्यायां चर्चित्वा आशयं विलिख्य सम्पुटं निर्मातु।**

**श्रद्धेयाः अंशाः -**

अनुबन्धपठनम्।
संघचर्चा।
निर्दिष्टानां सुभाषितानां चयनम्।
सम्पुटनिर्माणम्।

**अधो दत्तवाक्यात् उपसर्गं चित्वा लिखतु।**

**"चन्दनवृक्षाः स्वस्य सुखाय चन्दनलेपं न उपयुञ्जते।"**

**श्रद्धेयौ अंशौ -**

उपसर्गाणाम् अवगमनम्।
निर्देशानुसारं चित्वा लेखनम्।

**अमरकोशः**

तीरम् - कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु।
( कूलम्, रोधः, तीरम्, प्रतीरम्, तटम्)

## शब्दरूपाणि

**ऋकारान्तः पुल्लिङ्गः पितृशब्दः ।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | पिता | पितरौ | पितरः |
| **सं. प्रथमा** | हे पितः | हे पितरौ | हे पितरः |
| **द्वितीया** | पितरम् | पितरौ | पितॄन् |
| **तृतीया** | पित्रा | पितृभ्याम् | पितृभिः |
| **चतुर्थी** | पित्रे | पितृभ्याम् | पितृभ्यः |
| **पञ्चमी** | पितुः | पितृभ्याम् | पितृभ्यः |
| **षष्ठी** | पितुः | पित्रोः | पितॄणाम् |
| **सप्तमी** | पितरि | पित्रोः | पितृषु । |

**ऋकारान्तः स्त्रीलिङ्गः मातृशब्दः ।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | माता | मातरौ | मातरः |
| **सं. प्रथमा** | हे मातः | हे मातरौ | हे मातरः |
| **द्वितीया** | मातरम् | मातरौ | मातॄः |
| **तृतीया** | मात्रा | मातृभ्याम् | मातृभिः |
| **चतुर्थी** | मात्रे | मातृभ्याम् | मातृभ्यः |
| **पञ्चमी** | मातुः | मातृभ्याम् | मातृभ्यः |
| **षष्ठी** | मातुः | मात्रोः | मातॄणाम् |
| **सप्तमी** | मातरि | मात्रोः | मातृषु । |

## धातुरूपाणि

**'नि' उपसर्गपूर्वक युज् धातोः (परस्मैपदी) लिङ् रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | नियोजयेत् | नियोजयेताम् | नियोजयेयुः |
| **मध्यमपुरुषः** | नियोजयेः | नियोजयेतम् | नियोजयेत |
| **उत्तमपुरुषः** | नियोजयेयम् | नियोजयेव | नियोजयेम। |

**नश्धातु (परस्मैपदी) लट् रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | नश्यति | नश्यतः | नश्यन्ति |
| **मध्यमपुरुषः** | नश्यसि | नश्यथः | नश्यथ |
| **उत्तमपुरुषः** | नश्यामि | नश्यावः | नश्यामः। |

**जन् धातोः (आत्मनेपदी) लट् रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | जायते | जायेते | जायन्ते |
| **मध्यमपुरुषः** | जायसे | जायेथे | जायध्वे |
| **उत्तमपुरुषः** | जाये | जायावहे | जायामहे। |

## शब्दकोशः

| **पदम्** | **संस्कृतम्** | **कैरली** | **आङ्गलम्** |
|---|---|---|---|
| कूलम् | तीरम् | തീരം | Shore |
| दुर्लभम् | असाधारणम् | അസാധാരണം | Scarce |
| द्रुमः | वृक्षः | മരം | Tree |
| नियोजयेत् | सज्जीकरोतु | തയ്യാറാക്കുക | Should prepare |
| विद्या | ज्ञानम् | അറിവ് | Knowledge |
| शक्तिः | प्रतिभा | പ്രതിഭ | Genius |
| शयनम् | शय्या | കിടക്ക | Bed |

## अनुबन्धः

### नीतिबोधकानि सुभाषितानि

१. यान्ति न्यायप्रवृत्तस्य
तिर्यञ्चोऽपि सहायताम्।
अपन्थानन्तु गच्छन्तं
सोदरोऽपि विमुञ्चति॥

२. अक्रोधेन जयेत् क्रोधं
असाधुं साधुना जयेत्।
जयेत् कदर्थं दानेन
जयेत् सत्येन चानृतम्॥

३. क्षारं जलं वारिमुचः पिबन्ति
तदेव कृत्वा मधुरं वमन्ति।
सन्तस्तथा दुर्जनदुर्वचांसि
पीत्वा च सूक्तानि समुद्गिरन्ति ॥

४. अतितृष्णा न कर्तव्या
तृष्णां नैव परित्यजेत्।
शनैश्शनैश्च भोक्तव्यं
स्वयं वित्तमुपार्जितम्॥

५. उद्यमेन हि सिध्यन्ति
कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य
प्रविशन्ति मुखे मृगाः ॥

## किमधिगतम्।

| पठनप्रवर्तनानि | स्वीकृतम् | भागिकतया स्वीकृतम् | प्रगत्यर्थं यत्नः करणीयः |
|---|---|---|---|
| अन्वयलेखनम्। | | | |
| आशयलेखनम्। | | | |
| सतालमालापनम्। | | | |
| आशययुक्तानां श्लोकानां चित्वा लेखनम्। | | | |
| सम्पुटनिर्माणम्। | | | |
| उपसर्गचयनम्। | | | |

# अक्षरमाला

## स्वराः

| | | | | |
|---|---|---|---|---|
| अ | आ | इ | ई | उ |
| ऊ | ऋ | ॠ | ऌ | ए |
| ऐ | ओ | औ | अं | अः |

## व्यञ्जनानि

| | | | | |
|---|---|---|---|---|
| क | ख | ग | घ | ङ |
| च | छ | ज | झ | ञ |
| ट | ठ | ड | ढ | ण |
| त | थ | द | ध | न |
| प | फ | ब | भ | म |
| य | र | ल | व | |
| श | ष | स | ह | |

# ഭാരതത്തിന്റെ ഭരണഘടന

ഭാഗം IV ക

## മൗലിക കർത്തവ്യങ്ങൾ

51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ് :

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയസേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക, സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സമ്മിശ്രസംസ്കാരത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും, ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക;

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

# കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹികനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മീഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണ്ണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപൽക്കരമായ ജോലികളിൽനിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽനിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

## നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.

ബന്ധപ്പെടേണ്ട വിലാസം:
കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ
ശ്രീ ഗണേഷ്, റ്റി.സി. 14/2036, വാൻറോസ് ജംഗ്ഷൻ,
കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം – 34
ഫോൺ 0471 – 2326603
ഇ- മെയിൽ childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in
വെബ്സൈറ്റ് : www.kescpcr.kerala.gov.in

ചൈൽഡ് ഹെൽപ്പ് ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ – 1800 425 1400
കേരള പൊലീസ് ഹെൽപ്പ് ലൈൻ - 0471 – 3243000/44000/45000

*online **R.T.E Monitoring : www.nireekshana.org.in***